CC0. In Public Domain. Muthulakshmi Research Academy

सं०
५५

हर्षचरितसारः

संकलनकर्ता

पं० वे० अनंताचार्य

॥ श्री ॥

CC0. In Public Domain. Muthulakshmi Research Academy

हर्षचरितसारः

चेन्नपुरी पच्चयप्पकलाशाला-भूतपूर्वसंस्कृताध्यापकेन

पण्डित वे० अनंताचार्येण

श्रीमद्भट्टबाणसूक्तिभिरेव संकलितः

29 SEP 1975

PHONE No. 6034
MALVIYA PUSTAK KENDRA
AMINABAD, LUCKNOW.

प्रकाशक

रामनारायणलाल बेनीप्रसाद

प्रकाशक तथा पुस्तक-विक्रेता

इलाहाबाद - 211001

[illegible] एक रुपया

१-५० रुपये

CC0. In Public Domain. Muthulakshmi Research Academy

३म१२७३

यह पुस्तक सर्वश्री रामनारायणलाल बेनीप्रसाद द्वारा प्रकाशित तथा
श्री रामबाबू अग्रवाल द्वारा ज्ञानोदय प्रेस २७३ कटरा, इलाहाबादमें मुद्रित हुई ।

CC0. In Public Domain. Muthulakshmi Research Academy

भूमिका

यद्यपि भरतखंडेऽस्मिन् महामहिम्नाम् अस्मत्पूर्वपुरुषाणाम् अनुग्रहपरंपरापरीवाहभूतानि, अद्यत्वे पुरुषायुषशतेनापि अधिगन्तुम् अशक्यानि, रसभरभरितानि असंख्येयानि पद्यमयानि वाङ्मयानि, सकलैः सहृदयैः सशिरःकम्पं समास्वाद्यन्ते, तथापि भिन्नरुचीन् जनान् समाराधयितुम् उद्युञ्जानैः साहित्यरसास्वादरसिकैः अभिरूपैः गद्यरूपाणां प्रबन्धानां वैरल्यात् अत्यर्थं कृच्छ्रम् अनुभूयते इति महदिदं विषादस्थानम् । एवमस्मिन् दुर्जाते भट्टबाणप्रभृतयः कतिपये कवयः केवलं बहुमन्तव्याः यदेते कविताकौशलेन आत्मीयेन अस्मिन् साहित्यप्रपञ्चे सर्वथा गद्यग्रन्थदौर्लभ्याम् अपाचक्रिरे । तत्रापि महाकविः भट्टबाणोऽयं करतलामलकीकृतसारस्वतसर्वस्वः । कादम्बरीहर्षचरिताख्यग्रंथद्वयनिर्माणेन बहु उपकृतवान् सहृदयगोष्ठ्याः । बहवः खलु अध्येतारः निरतिशयरसभरभरितासु सुधानिष्यन्दनिर्विशेषासु श्रीमतो भट्टबाणस्य सूक्तिषु दीर्घदीर्घसमासगर्भितानां नानाविधविभक्त्यन्तविशेषणसमुदायसंवलितानां सौदामिनीविलसितैरिव क्षणदृष्टनष्टैः क्रियापदैः समुद्वेल्लितानां वाक्यसमुदायानाम् अनुवाचनेन परिश्रान्ताः कथाभागम् आन्तम् अवगन्तुम् अपारयन्तः भृशं परिश्रान्ताः दरीदृश्यन्ते । यद्यप्येतादृशानाम् अध्येतॄणाम् उपकर्तुम् ईहमानाः बहवः पंडिताः कादम्बरीं हर्षचरितं च बहुधा संचिक्षिपुः तथापि लेशतोऽपि वर्णनाप्रपञ्चं दूरीकृत्य प्रवृत्तस्य कथामात्रसारस्य एता-

CC0. In Public Domain. Muthulakshmi Research Academy

दृशस्य ग्रन्थस्य व्युत्पित्सूनाम् अत्यन्तोपकारकत्व मनसि निधाय अहम् इदं ग्रन्थग्रथने प्रावर्तिषि ।

अस्य महाकवेः जीवितचरितं तावत् कविनैव वर्णितं ग्रन्थारम्भे । अस्य जीवितकालोऽपि अस्मदीयचन्द्रापीडचरितस्य आंग्ल-टिप्पणीभूमिकायां निर्णीतोऽस्ति । शब्दार्थालंकारसौष्ठवादि-विचारस्तावत् कथाप्रधानेऽस्मिन् ग्रन्थे नात्यन्तम् औचित्यम् आधास्यतीति कृत्वा नात्र प्रयत्यते । 'संस्कृतभाषायां गद्यग्रन्थानां प्रणयने पद्यापेक्षया महान् प्रयासः' इति खलु कवीनाम् अनुभव-सिद्धं तत्त्वम् । इदमेव गद्यग्रन्थवैरल्ये प्रधानं कारणं भवितुम् अर्हति' इति च सुदृढम् अभिप्रैमः । गद्यग्रन्थेषु अक्षरसंख्यानियमा-भावेऽपि श्रवणकटुतराणि पदानि विहाय मधुरमधुराणि पदसंघटनानि संपादयितुं कियत् कौशलं प्रदर्शयितव्यम् इति सुस्पष्टं भविष्यति साक्षात् भट्टबाणकृतीः अनुवाचयतां विपश्चिताम् । श्रवणासेचनकैः पदसंघटनैः आयोजितानि अच्छोदसरोवर्णनानि इदानीमप्यस्माकं हृदयात् नापसर्पन्ति । मधुरमधुराणि जाबालिपर्णशालावर्णनानि नः स्वान्ते सततं नरीनृत्यन्ति । महाकवेः भट्टबाणस्य कृतीः संक्षेप्तुं व्यवस्यद्भिः अत्याश्चर्याणि अमृतप्रायाणि वर्णनानि विहातुं कीदृशं मनःकाठिन्यम् आविष्कृतम् इति सहृदया विदांकुर्वन्तु ।

कविं इमम् अधिकृत्य अयं कथाखंडः प्रस्तावेऽस्मिन् अनुगुणः इति कृत्वा चिन्त्यते--यदा हि भट्टबाणः कादम्बरीग्रन्थप्रणयन-समये नियति-वशात् अवशिष्टं ग्रन्थं प्रपूरयितुम् अनलंकर्मीणः

CC0. In Public Domain. Muthulakshmi Research Academy

अभवत्, तदा आत्मनः आत्मजयोः अन्यतरेण पूरयितुमिच्छन् तावाहूय 'पुरोवर्तिनं स्थाणुम् अधिकृत्य वाक्यम् एकं ब्रूतम्' इति आदिदेश । सांगेषु वेदेषु अधीती शब्दार्थसौष्ठवानभिज्ञः अस्य ज्येष्ठस्तनूजः वेदवाक्यवत् स्वरं कृत्वा "शुष्को वृक्षः तिष्ठति" इत्युवाच । अथ च काव्यालंकारनिपुणः रसरीतिभावादिषु कृत-परिश्रमः कनीयान् कुमारः "नीरसतरुरिह निवसति" इति निज-गाद । दृश्यताम् उभयोः वाक्ययोः एकार्थम् अभिदधतोः महत् उक्तिवैचित्र्यम् । अथ च भट्टबाणः कनीयांसम् एव ग्रन्थमिमं पूरयितुम् आदिदेश इति। एवञ्च गद्यग्रन्थप्रणयने केवलम् अनुभवम् एव प्रमाणीकृत्य पदसंघटनेषु माधुर्यं संपादयितव्यम् । तत्र महाकविः भट्टबाणः सार्वभौमः विजयते । सोऽयमधीतचतुर्दशविद्यास्थानः परिचितसकलकलामंडलः नानादेशसंचरणसमधिगतलोकतत्त्वः स्वशैशवादारभ्य विनयाधानरक्षणभरणप्रभृतिभिः पितृतुल्यं हर्ष-देवं प्रीणयितुम् तच्चरितम् उपवर्णयन् अनेन हर्षचरितग्रन्थप्रण-यनेन गद्यकविप्रथाम् अवाप्य विजृम्भितोत्साहः निरवद्यगन्धं कादम्बरीग्रन्थं प्रणिनाय । अतः सर्वैरपि संस्कृतभाषाप्रणयिभिः भट्टबाणस्य आद्यः कविताविलासभूतोऽयं हर्षचरितग्रन्थः अवश्यम् अनुवाचयितव्यः । 'तदनुवाचने प्रवृत्तानां विदुषां प्रथमतः कथा-मात्रम् अवगमयितुम् अलंकर्मीणः मदीयोऽयम् उद्योगः सर्वथा सफलः भविष्यति' इति संभावयामि । ग्रन्थेऽस्मिन् वर्णनाप्रपञ्चान् दूरीकृत्य श्रीमद्भट्टबाणवाक्यैरेव कथाभागमात्रं संग्रथितम् । तमिमं स्निग्धया दृष्ट्या पश्यन्तु सुधियः ।

V. ANANT CHARYA

CC0. In Public Domain. Muthulakshmi Research Academy

CC0. In Public Domain. Muthulakshmi Research Academy

ओम्

हर्षचरितसारः

एवमनुश्रूयते--पुरा किल भगवान् परमेष्ठी सुनासीरप्रमुखैः गीर्वाणैः परिवृतः ब्रह्मोद्याः कथाः कुर्वन् कदाचिदासाञ्चक्रे। तथासीनं च तं मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्वे च सप्तर्षिपुरस्सराः महर्षयः सिषेविरे; केचित् ऋचः समुदचारयन्; केचित् यजुंषि अपठन्; केचित् सामानि जगुः; तत्र तेषाम् अन्योन्यस्य विद्याविवादाः प्रादुरभवन्। अथातिरोषणः प्रकृत्या महातपाः मुनिरत्रेस्तनयः नाम्ना दुर्वासाः द्वितीयेन मन्दपालनाम्ना मुनिना सह कलहायमानः साम गायन् क्रोधान्धो विस्वरमकरोत्। सर्वेषु च शापभयात् प्रतिमन्नमौनेषु मुनिषु, भगवती देवी सरस्वती श्रु

दृष्ट्वा च तां हसन्तीम् स मुनिः 'आः पापकारिणि! दुर्वदग्धे! मामुपहससि' इत्युक्त्वा कामण्डलवेन वारिणा समुपस्पृश्य शापजलं जग्राह। ततो 'मर्षय भगवन्' इत्यनुनाथ्यमानोऽपि विबुधैः, 'स्खलितमेकं क्षमस्व' इति प्रसाद्यमानोऽपि स्वशिष्यैः, 'पुत्र! मा कृथास्तपसः प्रत्यूहम्' इति

CC0. In Public Domain. Muthulakshmi Research Academy

निवार्यमाणोऽप्यत्रिणा, "दुर्विनीते ! व्यपनयामि ते विद्या-जनितामुन्नतिमिमाम्, अधस्तात् गच्छ मर्त्यलोकम्" इत्युक्त्वा तच्छापोदकं विससर्ज । प्रतिशापदानोद्यतां सावित्रीम्, 'सखि ! संहर रोषम्' इत्यभिदधाना सरस्वत्येव न्यवारयत् ।

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा पितामहो भगवान् एवमुवाच—"ब्रह्मन् ! न खलु साधुसेवितोऽयं पन्थाः, क्षमा हि मूलं सर्वतपसाम्; रोषदोषनिषद्ये स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसं सरस्वतीम्" इत्युक्त्वा पुनराह—"वत्से सरस्वति ! विषादं मा गाः, एषा त्वामनुयास्यति सावित्री । आत्मजमुखकमलावलोकनावधिश्च ते शापोऽयं भविष्यति" इत्यभिधाय समुचिताह्निककरणायोदातष्ठत् ।

सरस्वत्यपि शप्ता किञ्चिदधोमुखी समं सावित्र्या गृहमगात्; क्रमेण च मन्दायमाने वासरे स्पष्टे च प्रदोषसमये सावित्री शून्यहृदयामिव किमपि ध्यायन्तीं सास्रां सरस्वतीमवादीत् "सखि ! त्रिभुवनोपदेशदानदक्षायाः तव पुरो जिह्वा जिह्वेति मे जल्पितुम् । जानास्येव दुरतिक्रमणीया दैववृत्तयः, दुस्त्यजाः जन्मभूमयः, दारयति हृदयं

CC0. In Public Domain. Muthulakshmi Research Academy

दारुणः संस्तुतजनविरहः, तथापि नार्हस्येवं भवितुम्; पुराकृते कर्मणि बलवति तिष्ठति को वावसरः शोकस्य, तदलम्; कथय कतमं भुवो भागमलङ्कर्तुमिच्छसि" इति।

सरस्वती प्रत्यवादीत् "प्रियसखि ! त्वया सह विचरन्त्याः न मे काञ्चिदपि पीडाम् उत्पादयिष्यति ब्रह्मलोकविरहः। त्वमेव वेत्सि भुवि समाधियोग्यानि स्थानानि" इत्यभिधाय विरराम। अन्येद्युः उदिते भगवति विरोचने, सरस्वती परित्यज्य वियोगविक्लवं स्वपरिजनं, त्रिः प्रदक्षिणीकृत्य चतुर्मुखं, सावित्रीद्वितीया ब्रह्मलोकतः निर्जगाम। निर्गत्य च क्रमेण मन्दाकिनीमनुसरन्ती मर्त्यलोकमवततार। अपश्यच्च अम्बरतलस्थितैव हिरण्यवाहनामानं महानदं यं जनाः 'शोण' इति कथयन्ति। दृष्ट्वा च तं रामणीयकहृतहृदया तस्यैव तीरे वासमरचयत्। उवाच च सावित्रीम्—"सखि ! रमयन्ति मां महानदस्यास्य उपकण्ठभूमयः, पक्षपाति च हृदयम् अत्रैव स्थातुं मे इति"। तथापि तथेत्यभिनन्दितवचना तस्य पश्चिमे तीरे समवातरत्। एकस्मिंश्च शुचौ लतामण्डपे गृहबुद्धिम् बबन्ध। विश्रान्ता च नातिचिरात् सावित्र्या सार्द्धम् उत्थाय उच्चितार्चनकुसुमा सस्नौ। पुलिनपृष्ठे प्रतिष्ठितं सैकतं शिवलिङ्गम् अभ्यर्च्य, अयत्नोपनतेन फलमूलेन शिशिरेण

CC0. In Public Domain. Muthulakshmi Research Academy

शोणवारिणा च शरीरस्थितिमकरोत् । अतिवाहितदिवसा च लतामण्डपशिलातले कल्पितपल्लवशयना सुष्वाप । अन्येद्युरपि अनेनैव क्रमेण नक्तंदिनमत्यवाहयत् ।

एवमतिक्रामत्सु दिवसेषु कदाचित् उत्तरस्यां दिशि तुरङ्गहेषितह्लादमशृणोत् । उपजातकुतूहला च निर्गत्य लतामण्डपात् विलोकयन्ती, कृपाणपाणिना युवप्रायेण पदातिबलेन सनाथम् अश्ववृन्दं ददर्श । मध्ये च तस्य पाण्डुरेणातपत्रेण कृतच्छायम् अष्टादशवर्षदेशीयं युवानमद्राक्षीत् । पार्श्वे च तस्य द्वितीयं परिणतवयसं पुरुषम् । अथ स युवा दिव्याकृति तत् कन्यायुगलं दूरादेव दृष्ट्वा तुरगादवततार । निवारितपरिजनश्च तेन द्वितीयेन साधुना सह चरणाभ्यामेव सविनयमपससर्प । कृतोपसंग्रहणौ तौ सावित्री समं सरस्वत्या वनवासोचितेनातिथ्येन उपजग्राह ।

आसीनयोश्च तयोरासीना तं द्वितीयं प्रवयसमवादीत् "आर्य ! कथय महानुभावस्यास्य आगमनेन कतमो देशः शून्यतां नीतः ? क्व वा गन्तव्यम् ? कस्य वायं कुमारः ? का चास्य जननी ? कानि नामाक्षराणि ?" इति । सा प्रतिव्याजहार—"आयुष्मति ! श्रूयताम् । अयं खलु भूषणं भार्गववंशस्य भगवतः च्यवनस्य तनयः

CC0. In Public Domain. Muthulakshmi Research Academy

दधीचो नाम, जनन्यस्य शर्यातस्य सुता राजपुत्री सुकन्या नाम । तां खलु देवीमन्तर्वत्नीं विदित्वा वैजनने मासि प्रसवाय पिता पत्युः पार्श्वात् स्वगृहमानाययत, असूत च सा तत्र देवीं दीर्घायुषमेनम् । तत्रैव राजगृहे राजीवलोचनोऽयमवर्धत । भर्तृगृहमागच्छन्त्यामपि दुहितरि मातामहो मनोविनोदनमासेचनकदर्शनमिमं नामुञ्चन्नप्तारम् । अशिक्षतायं तत्रैव सर्वा विद्याः सकलाश्च कलाः । कालेन चोपारूढयौवनमिममालोक्य मातामहः पितुरन्तिकमधुना व्यसर्जयत् । मामपि तस्य देवस्य शर्यातस्य आज्ञाकारिणं विकुक्षिनामानं भृत्यमवधारयतु भवती । इतश्च गव्यूतिमात्रं पारेशोणं भगवतः च्यवनस्य आश्रमः । तदवधिश्चेयं नौ यात्रा । वयमपि शुश्रूषवो वृत्तान्तमायुष्मत्योः, नेयमाकृतिः दिव्यतां व्यभिचरति, गोत्रानामनी तु श्रोतुमभिलषति नौ हृदयम्" इति । सा त्ववादीत्—"आर्य ! श्रोष्यसि कालेन । भूयसो दिवसानत्र स्थातुमभिलषति नौ हृदयम् । अल्पीयांश्चाध्वा । परिचय एव प्रकटीकरिष्यति । आर्येण न विस्मरणीयोऽयमनुषङ्गदृष्टो जनः" इत्यभिधाय तूष्णीमभवत् । अथ दधीच एवमुवाच, "आर्य करिष्यति प्रसादमार्या आराध्यमाना; पश्यामस्तावत्तातम् । उत्तिष्ठ व्रजामः" इति । तथेति तेनाभ्यनुज्ञातः

CC0. In Public Domain. Muthulakshmi Research Academy

शनैरुत्थाय कृतनमस्कृतिरुच्चचाल । तुरगारूढं च तं प्रयान्तं सरस्वती निश्चलतारकेण चक्षुषा सुचिरं व्यलोकयत् । उत्तीर्य शोणमचिरेणैव कालेन दधीचः पितुराश्रमपदं जगाम ।

गते च तस्मिन् सा तामेव दिशमालोकयन्ती सुचिरमतिष्ठत् । अथ स्मृत्वा तां तस्य रूपसंपदं पुनः पुनः व्यस्मयतास्याः हृदयम् । भूयोऽपि चक्षुराचकांक्ष तद्दर्शनम् । अथ गणरात्रापगमे विकुक्षिस्तेनैव वर्त्मना निवर्तमानः तं देशमाजगाम । कृतासनपरिग्रहन्तु तं प्रीत्या सावित्री पप्रच्छ 'आर्य ! कच्चित् कुशली कुमारः ?' इति । सोऽब्रवीत्—'आयुष्मति ! कुशली स्मरति च भवत्योः केवलम्, अमीषु दिवसेषु तनीयसीम् तनुं बिभर्ति, अन्वागमिष्यत्येव मालतीति नाम्ना वाणिनी वार्तां वो विज्ञातुम्', इति । एवं विज्ञाप्य विकुक्षिः उच्चावचैरालापैः सुचिरं स्थित्वा यथाभिलषितं देशमयासीत् । अपरेद्युरुद्यति भगवति सहस्ररश्मौ शोणमुत्तीर्यायान्ती मालती समदृश्यत । सरस्वत्याः समीपमुपसृत्य दूरादेवावनतेन मूर्ध्ना प्रणम्य बभाषे—'देवि ! विज्ञाप्यं नः किञ्चिदस्ति रहसि । अतो मुहूर्तमवधानं दातुमर्हसि' इति । सरस्वत्येवमुवाच 'किमेवमभिदधासि ? विधेयास्मि ते, ब्रूहि

CC0. In Public Domain. Muthulakshmi Research Academy

विवक्षितम्' इति । सा त्ववादीत्—'देवि ! यदैव दृष्टासि देवेन, तत एवारभ्यायं बलवता कामेन बाध्यते । तदहं देवस्य प्राणरक्षार्थमर्थये अत्र भवतीम्' इति । सरस्वती प्रत्यवादीत्—'अयि ! न शक्नोमि बहुभाषितुम् । एषास्मि ते वचसि स्थिता' इति मालती तु प्रहर्षपरवशा प्रणम्य प्रजविना तुरगेण ततार शोणम्, अगाच्च दधीचमानेतुं च्यवनाश्रमपदम् । सरस्वती तु सखीस्नेहेन सावित्रीमपि विदितवृत्तान्तामकरोत् ।

अथास्तमुपगतवति भगवति गभस्तिमति आजगाम मालतीद्वितीयो दधीचः । आगत्य च हंसगद्गदया गिरा कृतसंभाषणः सरस्वत्या सह रममाणः एकं दिवसमिवानयत्संवत्सरम् । अथ सरस्वती बभार गर्भम् । असूत सर्वलक्षणाभिरामं तनयम् । तस्मै च जातमात्रायैव सम्यक् सरहस्याः सर्वे वेदाः सर्वाणि शास्त्राणि सकलाश्च कलाः मत्प्रसादात् स्वयमाविर्भविष्यन्तीति वरमदात् । अथ पितामहादेशात् समं सावित्र्या ब्रह्मलोकमारुरोह ।

गतायाञ्च तस्यां दधीचः भार्गववंशसंभूतस्य भ्रातुर्ब्राह्मणस्य जायामक्षमालाभिधानाम् मुनिकन्यकाम् आत्मसूनोः संवर्धनाय नियुज्य विरहातुरः तपसे वनमगात् ।

CC0. In Public Domain. Muthulakshmi Research Academy

यस्मिन्नेवावसरे सरस्वत्यसूत तनयं, तस्मिन्नेवाक्षमालापि सुतं प्रसूतवती । सा तु तौ निर्विशेषं शिशू समवर्धयत् । एकस्तयोः सारस्वताख्य एवाभवत् । द्वितीयोऽपि वत्सनामाभवत् । आसीच्च तयोः सोदर्ययोरिव स्पृहणीया प्रीतिः । अथ सारस्वतो मातुर्महिम्ना यौवनारम्भ एवाविर्भूताशेषविद्यः सवयसि वत्से समस्तमेव वाङ्मयं सञ्चारयामास । कृतदारपरिग्रहस्यास्य तस्मिन्नेव प्रदेशे प्रीतिकूटनामानं निवासमकरोत् । स्वयं तु आषाढ़ी, कृष्णाजिनी, वल्कली, मेखली च भूत्वा तपस्यतो जनयितुरेव जगामान्तिकम् ।

अथ वत्सात् प्रावर्तत विपुलो वंशः यस्मादजायन्त वात्स्यायना नाम मुनयः । अथ बहुषु कालेषु अवतीर्णे कलौ, तस्मिन् वात्स्यायनकुले कुबेरनामा द्विजो जन्म लेभे । तस्याभवन् अच्युतः, ईशानः, हरः, पाशुपतश्चेति चत्वारस्तनयाः । तत्र पाशुपतस्य एक एवार्थपतिरिति नाम्ना महात्मा सूनुरभवत् । सोऽजनयत् भृगुं हंसं शुचिं कविं महीदत्तं धर्मं जातवेदसं चित्रभानुं त्र्यक्षम् अहिदक्षं विश्वरूपञ्च इत्येकादश पुत्रान् । अलभत चित्रभानुस्तेषां मध्ये राजदेव्याभिधानायां ब्राह्मण्यां बाणमात्मजम् । स बाल एव विधिवशात् व्ययुज्यत जनन्या । जात-

CC0. In Public Domain. Muthulakshmi Research Academy

स्नेहस्तु नितरां पितैवास्य मातृताम् अकरोत् । अकृतोपनयनादिक्रियाकलापस्य समावृत्तस्य चतुर्दशवर्षदेशीयस्यास्य पितापि अस्तमगात् । संस्थिते पितरि महता शोकेन दिवानिशं दह्यमानहृदयः कथं कथमपि कतिपयान् दिवसान् आत्मगृह एवानैषीत् । अथ शनैःशनैः विरलतां गते अविनयनिदाने स्वातंत्र्ये वर्तमानः शैशवोचितान्यनेकानि चापलान्याचरन् इतवरो बभूव । अभवंश्चास्य वयसा समानाः बहवः सुहृदः सहायाश्च ।

स एतैश्चान्यैश्चानुगम्यमानः देशान्तरावलोकनकौतुकाक्षिप्तहृदयः सत्स्वपि पितृपितामहोपात्तेषु, विभवेषु सति चाविच्छिन्ने विद्याप्रसंगे, गृहान्निरगात् । अगाच्च स्वैरिणा नवयौवनेन महतामुपहास्यताम् । अयं शनैःशनैः मनोहराणि अत्युदाराणि राजकुलानि वीक्षमाणः बहूनि गुरुकुलानि सेवमानः, पुनरपि आत्मवंशोचितां वैपश्चितीं प्रकृतिमभजत । महतश्च कालात् तामेव भूयो जन्मभुवमाजगाम । यत्र चाप्तैरभिनन्दितागमनः मित्रमण्डलमध्यगतः चिरदृष्टानां बान्धवानां परिभ्रमन् प्रीयमाणः सुखमासांचक्रे ।

कदाचिदत्युग्रे ग्रीष्मसमये स्वगृहावस्थितस्यास्य भुक्तवतः पराह्णसमये भ्राता पाराशवश्चन्द्रसेननामा प्रवि-

CC0. In Public Domain. Muthulakshmi Research Academy

श्याकथयत्—'एष खलु महाराजाधिराजपरमेश्वरश्रीहर्षदेवस्य भ्राता कृष्णनाम्ना भवतामन्तिकं प्रहितः दूतः द्वारमध्यास्ते' इति । सोऽब्रवीत्—'आयुष्मन् ! अविलम्बितं प्रवेशयैनम्' इति । अथ तेनानीयमानं लेखहारकं प्रविशन्तमद्राक्षीत्, अप्राक्षीच्च दूरादेव—"भद्र ! भद्रं तत्र भवतः कृष्णस्य" इति । स च 'भद्रम्' इत्युक्त्वा प्रणम्य नातिदूरे समुपाविशत् । विश्रान्तश्च 'एष खलु स्वामिनो लेखः प्रहितः' इति विमुच्यार्पयत् । अथ बाणः सादरं गृहीत्वा स्वयमेवावाचयत् । "मेखलकात् संदिष्टमवधार्य फलप्रतिबन्धो धीमद्भिरपहरणीयः कालातिपातः इत्येतावदत्रार्थजातम्, इतरत् वार्तासंवादनमात्रकम्" इति । अवधृतलेखार्थश्च समुत्सारितपरिजनः संदेशं पृष्टवान् । मेखलकस्त्ववादीत्—एवमाह मेधाविनं स्वामी "जानात्येव मान्यः यथा एकदेशनिवासः दर्शनाभ्यासः परोक्षोपकारकरणं वा स्नेहस्य हेतवः । त्वयि तु विना कारणेन अदृष्टेऽपि प्रत्यासन्ने बन्धाविव किमपि स्निह्यति मे हृदयम् । भवन्तमन्तरेणान्यथा चक्रवर्ती दुर्जनैः ग्राहित आसीत् । न च तत्तथा । शिशुचापलवर्तितया च भवतः केनचिदसहिष्णुना यत् किञ्चिदसदृशमुदीरितम् इतरो लोकस्तथैव तद्गृह्णाति वक्ति च । बहुमुख-

CC0. In Public Domain. Muthulakshmi Research Academy

श्रवणनिश्चलीकृतनिश्चयः किं करोतु पृथिवीपतिः । तत्त्वान्वेषिभिश्चास्माभिः दूरस्थितोऽपि प्रत्यक्षीकृतोऽसि । विज्ञप्तश्चक्रवर्ती त्वदर्थम् यथा—'प्रायेण प्रथमे वयसि सर्वस्यैव चापलैः शैशवमपराधीति' तथेति प्रतिपन्नं स्वामिना । अतो भवता राजकुलमकृतकालक्षेपमागन्तव्यम्" इति । श्रुत्वैतत् तमेव चन्द्रसेनं समादिशत्—'कृतकशिपुं विश्रान्तसुखिनमेनं कारय' इति ।

अथ गते तस्मिन् पर्यस्ते च वासरे कृतसन्ध्योपासनः शयनीयमगात् । अचिन्तयच्चैकाकी 'किं करोमि ? अन्यथा संभावितोऽस्मि राज्ञा निर्निमित्तबन्धुना सन्दिष्टमेवं कृष्णेन । अवश्यं गन्तव्यम् । भगवान् पुरारातिः गतस्य मे सर्वं सांप्रतमाचरिष्यति' इत्यवधार्य गमनाय मतिमकरोत् ।

अथान्यस्मिन्नहनि उत्थाय प्रातरेव स्नात्वा, धृतधवलदुकलवासाः, गृहीताक्षमालः, प्रास्थानिकानि सूक्तानि बहुशः समावर्त्य, देवदेवस्य विरूपाक्षस्य पूजां विधाय, भगवन्तमाशुशुक्षणिं हुत्वा, दत्त्वा द्युम्नं[1] यथाविद्यमानं द्विजेभ्यः, शुक्लाङ्गरागः, शुक्लमाल्यः, मालत्याख्यया

१—द्युम्नम्—धनम् ।

CC0. In Public Domain. Muthulakshmi Research Academy

पितुः कनीयस्या स्वस्त्रा कृतसकलगमनमङ्गलः प्रथम-चलितदक्षिणचरणः प्रीतिकूटान्निरगात् । प्रथमेऽहनि धर्म-कालकष्टं निरुदकं मल्लकूटनामानं ग्राममगात् । तत्र हृदयनिर्विशेषेण भ्रात्रा सुहृदा च जगत्पति-नाम्ना संपादितसपर्यः सुखमवसत् । अथापरेद्युरुत्तीर्य भगवतीं भागीरथीं यष्टिगृहकनाम्नि वनग्रामके निशामन-यत् । अन्यस्मिन् दिवसे स्कन्धावारं उपमणितारं कृतसंनि-वेशमाससाद । अतिष्ठच्च नातिदूरे राजभवनस्य । मेख-लकस्तु "तिष्ठतु तावत् क्षणमत्रैव महाभाग" इति तम-भिधाय अप्रतिहतः पुरं प्राविशत् । अथ स मुहूर्तादिव वेत्रपाणिना पुरुषेणानुगम्यमानः निर्गत्यावोचत्—'एष खलु देवस्य पारियात्रनामा दौवारिकः । समनुगृह्णातु भवानेन-मनुरूपया प्रतिपत्त्या' इति । दौवारिकः समुपसृत्य कृत-प्रणामः मधुरया गिरा सविनयमभाषत—'आगच्छतु, प्रविशतु, दर्शनाय कृतप्रसादो देव' इति । बाणस्तु 'धन्योऽस्मि' इत्युक्त्वा तेनोपदिश्यमानमार्गः प्राविश-दभ्यन्तरम् । समतिक्रम्य त्रीणि कक्ष्यान्तराणि चतुर्थेऽजिरे स्थितं राजलक्ष्म्या विराजमानं चक्रवर्तिनं हर्षमद्राक्षीत्; दृष्ट्वा च समुपसृत्य उपवीती स्वस्तिशब्दमकरोत् ।

राजा तु तं दृष्ट्वापृच्छत्—'एष स बाण' इति ।

CC0. In Public Domain. Muthulakshmi Research Academy

'यथाज्ञापयति देवः । सोऽयम्' इति विज्ञापितो दौवारिकेण, न तावदेनमकृतप्रसादः पश्यामीति चक्षुः परिवृत्य पृष्ठतो निषण्णस्य मालवराजसूनोरकथयत् "महानयं भुजङ्ग" इति ।

अथ बाणो मुहूर्त्तमिव तूष्णीं स्थित्वा व्यज्ञापयत्— 'देव ! अविज्ञाततत्त्व इव किमेवमाज्ञापयसि ? नार्हसि मामन्यथा संभावयितुम् । ब्राह्मणोऽस्मि जातः सोमपायिनां वंशे वात्स्यायनानाम् । यथाकालमुपनयनादयः कृताः संस्काराः । सम्यक् पठितः साङ्गो वेदः । श्रुतानि यथाशक्ति शास्त्राणि । दारपरिग्रहादभ्यागारिकोऽस्मि । का मे भुजङ्गता ? लोकद्वयाविरोधिभिस्तु चापलैः शैशवमसून्यमासीत् अत्रानपलापोऽस्मि । सर्वथा कालेन मां ज्ञास्यति स्वामी स्वयमेव' इत्यभिधाय तूष्णीमभूत् ।

भूपतिरपि एवमस्माभिः श्रुतमित्यभिधाय तूष्णीमेवाभवत्, संभाषणासनदानादिना तु प्रसादेन नैनमन्वग्रहीत् । केवलं स्नेहगर्भेण दृष्टिपातमात्रेण अन्तर्गतां प्रीतिमकथयत् । अस्तोन्मुखे सवितरि विसर्जितराजलोकः अभ्यन्तरं प्राविशत् । बाणोऽपि निर्गत्य निवासस्थानमगात् । अकरोच्च चेतसि 'अतिदक्षिणः खलु देवो हर्षः यदेवं कुपितोऽपि मनसा स्निह्यत्येव मयि; इच्छति च

CC0. In Public Domain. Muthulakshmi Research Academy

मां गुणवन्तम्; सर्वथा करोमि तथा यथा यथावस्थितं जानाति मामयं कालेन' इत्येवमवधार्य अपरेद्युः निष्क्रम्य कटकात् सुहृदां बान्धवानाञ्च भवनेषु तावदतिष्ठत् यावदस्य स्वयमेव गृहीतस्वभावः पृथिवीपतिः प्रसादवानभूत्। अविशच्च पुनरपि नरपतिभवनम्। स्वल्पैरेवाहोभिः परमप्रीतेन नरेन्द्रेण प्रसादस्य परां कोटिमानीयत।

अथ कदाचित् शरत्समयारम्भे राज्ञः समीपात् बाणः बन्धून् द्रष्टुं पुनरपि तं ब्राह्मणाधिवासमगमत्। तत्र समुपलब्धभूपालसंमानैः ज्ञातिभिः श्लाघ्यमानः बन्धुमध्यवर्तीपरं मुमुदे। अथ कदाचित् भुक्तवन्तं तं ज्ञातयः पर्यवारयन्। तत्र बाणस्य पितृव्यपुत्राः चत्वारो भ्रातरो बभूवुः। तेषु कनीयान् श्यामलो नाम सप्रणयमिदं बभाषे 'तात! सुगृहीतनाम्नः पुण्यराशेः महाराजहर्षस्य चरितमादितः प्रभृति श्रोतुमिच्छामः' इति। बाणस्तु विहस्याब्रवीत् 'न युक्त्यनुरूपमभिहितम्। शक्याशक्यपरिसंख्यानं न कृतम्। क्व परिमितवर्णवृत्तयः कतिपये शब्दाः? क्व संख्यातिगास्तद्गुणाः? सर्वज्ञस्याप्ययमविषयः किमुतास्मद्विधस्य? कः खलु पुरुषायुषशतेनापि शक्नुयादविकलमस्य चरितं वर्णयितुम्? एकदेशे तु यदि कुतूहलं वः, सज्जा वयम्। इयमधिगतकतिपयाक्षरा जिह्वा क्वो-

CC0. In Public Domain. Muthulakshmi Research Academy

पयोगं गमिष्यति। भवन्तः श्रोतारः, वर्ण्यते हर्षचरितम्, किमन्यत् ?' इत्युक्त्वा तेषां पुरो हर्षचरितं कथयितुमारेभे।

अस्ति श्रीकण्ठो नाम जनपदः, तत्र च स्थाण्वीश्वराख्यो जनपदविशेषः। तत्र च राजा पुष्यभूतिरिति नाम्ना बभूव। तस्य केनचिदनुपदिष्टा सहजैव शैशवादारभ्य भगवति भवानीवल्लभे भूयसी भक्तिरभूत्। परममाहेश्वरः स भूपालः लोकतः शुश्राव भगवन्तं दाक्षिणात्यं भैरवाचार्यनामानं महाशैवम्। श्रवणसमकालमेव तस्मिन् भैरवाचार्ये गरीयसीं बबन्ध भक्तिम्। आवकांक्ष च सर्वथाप्यस्य दर्शनम्।

अथ कदाचित् पर्यस्ते वासरे राजानमुपसृत्य प्रतीहारी विज्ञापितवती—'देव ? द्वारि परिव्राडास्ते। कथयति च भैरवाचार्यवचनात् देवमनुप्राप्तोऽस्मीति' इति। राजा तु तत् श्रुत्वा सादरं 'क्वासौ प्रवेशयैनम्' इत्यब्रवीत्। तथा चाकरोत् प्रतिहारी। आगतं च मस्करिणं भूपतिरुचितम् उपचचार। पप्रच्छ च 'क्व भैरवाचार्य' इति। परिव्राट् तमुपनगरं सरस्वतीतटवनावलम्बिनि शून्यायतने स्थितमाचचक्षे। भूयश्च बभाषे—'अर्चयति च महाभागं भगवानाशीर्वचसा' इत्युक्त्वा भैरवाचार्यप्रहितानि पञ्च

CC0. In Public Domain. Muthulakshmi Research Academy

रत्नवन्ति राजतानि पुण्डरीकाणि उपनिन्ये । नरपतिस्तु दाक्षिण्यमनुरुध्यमानस्तानि जग्राह । जगाद च—'श्वो द्रष्टास्मि भगवन्तम्' । इति उक्त्वा मस्करिणं व्यसर्जयत् ।

अपरेद्युश्च प्रातरेवोत्थाय वाजिनमधिरुह्य भैरवाचार्यं द्रष्टुं प्रतस्थे । गत्वा किञ्चिदन्तरं तदीयमेवाभिमुखमापतन्तमन्यतमं शिष्यमद्राक्षीत् । अप्राक्षीच्च क्व भगवानास्ते । सोऽकथयत्—'अस्य जीर्णमातृगृहस्योत्तरेण बिल्ववाटिकामध्यास्ते' इति । गत्वा च तं प्रदेशमवततार । प्रविवेश च बिल्ववाटिकाम् । अथ महतः कार्पटिकवृन्दस्य मध्ये, प्रातरेव स्नातमनुष्ठिताग्निकार्यम् व्याघ्रचर्मण्युपविष्टम् भगवन्तं साक्षादिव विरूपाक्षं भैरवचार्यं ददर्श । भैरवाचार्यस्तु दूरादेव राजानं दृष्ट्वा प्रत्युद्गम्य, श्रीफलोपायनं समर्प्य गम्भीरया गिरा स्वस्तिशब्दमकरोत् । नरपतिरपि दूरावनतः प्रणामं चकार । आचार्योऽपि 'आगच्छ, अत्रोपविश' इति आत्मीयं शार्दूलचर्मादर्शयत् । राजा तु सप्रश्रयं व्याजहार—'भगवन् ! अभूमिरयमुपचाराणाम् । अलमतियन्त्रणया । माननीयञ्च गुरुवन्नोल्लङ्घनमर्हति गुरोरासनम् । आसताञ्च भवन्त एवात्र' इति व्याहृत्य परिजनोपनीते वाससि निषसाद । भैरवाचार्योऽपि पूर्ववत्तदेव व्याघ्राजिनमभजत ।

CC0. In Public Domain. Muthulakshmi Research Academy

आसीने च राजनि शिष्यजनेन समुचितमर्घ्यादिकं कारयामास। राजा तु विविधाभिः कथाभिः चिरं स्थित्वा गृहमगात्।

अन्यस्मिन् दिवसे भैरवाचार्यो राजानं द्रष्टुं ययौ। तस्मै स राजा सपरिजनं सकोशमात्मानं निवेदितवान्। स च विहस्य 'तात क्व विभवाः, क्व वयं वनवर्धिताः? भवादृशा एव भाजनं भूतेः' इत्युक्त्वा स्थित्वा च कञ्चित्कालं जगाम। परिव्राट् तेनैव क्रमेण पञ्च पञ्च राजतानि पुण्डरीकाणि उपायनीचकार। एकदा तु श्वेतकर्पटावृतं किमप्यादाय प्राविशत्। उपविश्य पूर्ववत् स्थित्वा मुहूर्तमब्रवीत्--'महाभाग! भवन्तमाह भगवान् यथा---'अस्मच्छिष्यः पातालस्वामिनामा ब्राह्मणः। तेन ब्रह्मराक्षसहस्तात् अट्टहासनामा महासिरपहृतः। सोऽयं भवद्भुजयोग्यो गृह्यताम्' इत्यभिधाय अपहृतकर्पटाच्छादनात् परिवाराद् आचकर्ष कृपाणम्। अवनिपतिस्तु तं करेण गृहीत्वा सुचिरं ददर्श। सन्दिदेश च--वक्तव्यो भगवान् 'परद्रव्यग्रहणदुर्विदग्धमपि मे मनः युष्मद्विषये न शक्नोति वचनव्यतिक्रममाचरितुम्' इति। परिव्राट् तु गृहीते तस्मिन् परितुष्टः, "स्वस्ति भवते, साधयामः" इत्युक्त्वा निरयासीत्।

CC0. In Public Domain. Muthulakshmi Research Academy

अथ व्रजत्सु दिवसेषु एकदा भैरवाचार्यो राजानमुपह्वरे जगाद---'तात ! महाकालहृदयाख्यं महामन्त्रं जपकोट्या सेवितवानस्मि। यस्य वेतालसाधनावसाना सिद्धिः। असहायैश्च सा दुरापा। तद्व्यालमस्मै कर्मणे। त्वयि च गृहीतभरे भविष्यन्त्यपरे सहायास्त्रयः। एकः स एवास्माकं टीटिभनामा बालमित्रं मस्करी, यो भवन्तमुपतिष्ठते। द्वितीयः स पातालस्वामी। अपरो मच्छिष्य एव कर्णतालनामा द्राविडः। यदि साधु मन्यसे, गृहीताट्टहासः प्रतिष्ठस्व' इति। अथ नरेन्द्रः समभाषत 'भगवन् ! परमनुगृहीतोऽस्मि अनेन निदेशेन' इति ननन्द च तेन नरेन्द्रव्याहृतेन भैरवाचार्यः। चकार च संकेतम् 'अस्यामेवागामिन्यां असितपक्षचतुर्दशीक्षपायाम् इयत्यां वेलायाम् अमुष्मिन् महाश्मशानसमीपभाजि शून्यायतने शस्त्रद्वितीयेनायुष्मता द्रष्टव्या वयम्' इति।

अथातिक्रान्तेष्वहःसु प्राप्तायाञ्च तस्यामेव कृष्णचतुर्दश्याम् शैवेन विधिना दीक्षितः क्षितिपः नियतवानभूत्। ततः परिणते दिवसे विगाढायां शर्वर्यां सुप्तजननिश्शब्दस्तिमिते निशीथे, राजा सान्तःपुरं परिजनं वञ्चयित्वा, वामकरेण उत्खातं खड्गमट्टहासमादाय, एकाकी

CC0. In Public Domain. Muthulakshmi Research Academy

नगरात् निरगात् । अगाच्च तमुद्देशम् । अथ प्रत्युज्जग्मुस्ते त्रयः टीटिभकर्णतालपातालस्वामिनः । निवेदितवन्तश्चात्मानम् । अवनिपतिस्तु 'कोऽत्र क' इति त्रीनपृच्छत् । आचचक्षिरे च स्वं स्वं नाम त्रयोऽपि ते । तैरेव चानुगम्यमानो जगाम तां समुपकल्पितसर्वोपकरणां भीषणां साधनभूमिम् । तस्याञ्च भस्मना लिखितस्य महतो मंडलस्य मध्ये स्थितम् उत्तानशयस्य शवस्योपरि उपविश्य जातजातवेदसि मुखकुहरे प्रारब्धाग्निकार्यम्, कृष्णोष्णीषम्, कृष्णाङ्गरागम्, कृष्णप्रतिसरं कृष्णवाससं मुखेन किमपि जपन्तम् कृष्णतिलाहुतिकरं भैरवाचार्यमपश्यत् । उपसृत्य चाकरोन्नमस्कारम् । अभिनन्दितश्च तेन स्वव्यापारमन्वतिष्ठत् । अत्रान्तरे पातालस्वामी शातक्रतवीमाशामङ्गीचकार । कर्णतालः कौबेरीम् । परिव्राट्, प्राचेतसीम् । राजा तु त्रैशङ्कवेन ज्योतिषांकितां ककुभमलंकृतवान् ।

एवं चावस्थितेषु दिक्पालेषु गलत्यर्धरात्रिसमये, मण्डलस्य नातिदवीयस्युत्तरेण अकस्मात् क्षितिरदीर्यत । सहसैव तस्माद्विवरात् कुवलयश्यामलः पुरुष उज्जगाम । जगाद च विहस्य भो विद्याधरीश्रद्धाकामुक ! किमयं विद्यावलेपः सहायमदो वा ? तदस्मै जनाय अविधाय

CC0. In Public Domain. Muthulakshmi Research Academy

बलिं बालिश इव सिद्धिमभिलषति । का ते दुर्बुद्धिरियम् ? एतावता कालेन क्षेत्राधिपतिरस्य मन्नास्नैव लब्धव्यपदेशस्य देशस्य नागतस्ते श्रोत्रोपकण्ठं श्रीकण्ठनामा नाऽहम् भूनाथोऽप्यनाथस्तपस्वी, यस्त्वादृशैः शैवपदैरुपकरणीक्रियते । सहस्वेदानीं सहामुना दुर्नरेन्द्रेण दुर्णयस्य फलम्, इत्यभिधाय, निष्ठुरैः प्रकोष्ठप्रहारैः त्रीनपि टीटिभप्रभृतीन् अपातयत् । अथ नरनाथः सावज्ञमवादीत्--'अरे काकोदर ! मयि स्थिते राजहंसे न जिह्रेषि बलिं याचितुम् । अमीभिः किं वा परुषभाषितैः? भुजे वीर्यं निवसति न वाचि, प्रतिपद्यस्व शस्त्रम्, अथं न भवसि ? अगृहीतहेतिष्वशिक्षितो मे भुजः प्रहर्तुम् इति । नागस्तु अनादृततरम् "एहि, किं शस्त्रेण, भुजाभ्यामेव भनज्मि भवतो दर्पम्" इति अभिधायास्फोटयामास । नरपतिरपि निरायुधमायुधेन लज्जमानो जेतुम् उत्सृज्य खड्गम् बबन्ध बाहुयुद्धाय कक्ष्याम् । युयुधाते च तौ शिलास्तम्भैरिव पतद्भिः बाहुदण्डैः । न चिराच्च पातयामास भूतले भुजङ्गं, भूपतिः जग्राह च केशेषु । उच्चखान शिरः छेत्तुमट्टहासम् । मालान्तरेणास्य यज्ञोपवीतम् दृष्ट्वा तं विससर्ज ।

अनन्तरञ्च अतिबहुलां ज्योत्स्नां ददर्श । शरदि

CC0. In Public Domain. Muthulakshmi Research Academy

विकसतां कमलवनानामिव आमोदमजिघ्रत्। झटिति नूपुरशब्दमशृणोत् व्यापारयामास शब्दानुसारेण दृष्टिम्। अथ तामरसहस्तां स्त्रियमपश्यत्। पप्रच्छ च 'भद्रे! कासि? किमर्थमिहागतासि?' इति। सा त्वभाषत 'वीर, विद्धि मां नारायणोरःस्थलविहारिणीं श्रियम्। प्रीतास्मि तवामुना शौर्यरसेन। याचस्व, ददामि ते वरम्' इति। राजा तु तां प्रणम्य स्वार्थविमुखः भैरवाचार्यस्य सिद्धिं ययाचे। लक्ष्मीस्तु देवी प्रीततरहृदया 'एवमस्तु' इत्यब्रवीत्। अवादीच्च पुनः 'भवान् भुवि महतो राजवंशस्य कर्ता भविष्यति, यस्मिन् उत्पत्स्यते हर्षनामा चक्रवर्ती।' इति वचसोऽन्ते तिरोबभूव। भूमिपालस्तु तदाकर्ण्यातिमात्रमप्रीयत। भैरवाचार्योऽपि तस्या देव्या वचनेन सद्य एव किरीटी कुण्डली हारी भूत्वा विद्याधरत्वमवाप। प्रोवाच च 'राजन्! इच्छामि येन केनचित् कार्यलवोपपादनोपयोगेन स्मारयितुमात्मानमिति।' राजा तु 'भवत्सिद्ध्यैव परिसमाप्तकृत्योऽस्मि। साधयतु मान्यो यथासमीहितं स्थानम्' इति प्रत्याचचक्षे। अथ स टीटिभादीन् सुदृढं समालिङ्ग्य 'सर्वथा स्मर्तव्या वयमित्यभिधाय गगनतलमुत्पपात। श्रीकण्ठोऽपि 'राजन्! परा-

CC0. In Public Domain. Muthulakshmi Research Academy

क्रमक्रीतः कर्तव्येषु नियुज्यतामयं जनः' इत्यभिधाय राज्ञानुमोदितः तदेव भूयो भूविवरं प्रविवेश । नरपतिस्तु क्षीणभूयिष्ठायां क्षपायां त्रीनपि टीटिभादीन् गृहीत्वा युद्ध-व्यतिकरमलीमसानि अङ्गानि वनवापीपयसि प्रक्षाल्य नगरं विवेश । कतिपयदिवसापगमे च परिव्राट् भूभुजा वार्यमाणोऽपि वनं ययौ । पातालस्वामिकर्णतालौ तु शौर्या-नुरक्तौ तमेव सिषेवाते ।

अथ तस्माद् पुष्पभूतेः निर्जगाम राजवंशः । तत्रोद-पादि प्रतापशील इति प्रथितापरनामा प्रभाकरवर्धनो नाम राजा । तस्य च यशोवती नाम महिषी बभूव । निसर्गत एव स भूपतिरादित्यभक्तो बभूव । प्रतिदिनमुदये स्नातः सितदुकूलधारी प्राङ्मुखः क्षितौ जानुभ्यां स्थित्वा रक्त-कमलषण्डेन दिनकरस्य अर्चां ददौ । अजपच्च प्रत्युषसि मध्यन्दिने दिनान्ते च अपत्यहेतोः मन्त्रमादित्यहृदयम् । अथ कदाचित् ग्रीष्मसमये स राजा यदृच्छया हर्म्यस्य पृष्ठे सुष्वाप । पार्श्वे चास्य द्वितीयशयने देवी यशोवती शिश्ये । परिणतप्रायायान्तु श्यामायां देवी यशोवती सहसैव "आर्यपुत्र ! परित्रायस्व परित्रायस्व" इति भाष-माणा उदतिष्ठत् । तेन ध्वनिना प्रबुद्धो राजा "देवि !

CC0. In Public Domain. Muthulakshmi Research Academy

न भेतव्यं, न भेतव्यम्" इत्यभिदधानो वेगेनोत्पपात। सर्वासु च दिक्षु विक्षिपन् चक्षुः यदा नाद्राक्षीत् किञ्चिदपि, तदा पप्रच्छ तां भयकारणम्। सा समभाषत—"आर्यपुत्र! जानामि स्वप्ने भगवतः सवितुर्मण्डलात् निर्गत्य द्वौ कुमारकौ तेजोमयौ गृहीतशस्त्रौ कन्यकया एकया चानुगम्यमानौ क्षितितलमवतीर्णौ। तौ च मे विनपन्त्याः शस्त्रेणोदरं विदार्य प्रवेष्टुमारब्धौ। प्रतिबुद्धास्मि चार्यपुत्रं विक्रोशन्ती वेपमानहृदया" इति। एतस्मिन्नेव काले रराण प्रभातशङ्खः। नरपतिस्तु तत् श्रुत्वा प्रीयमाणेनान्तःकरणेन तामवादीत् 'देवि! मुहोवसरे विषीदसि। पूर्णा नो मनोरथाः। प्रसन्नस्ते भगवानंशुमाली। न चिरेणैव अपत्यत्रयलाभेनानन्दयिष्यति भवतीम्' इति।

ततः समतिक्रान्ते कस्मिंश्चित्कालं देव्यां यशोवत्यां देवो राज्यवर्धनः प्रथममेव संबभूव गर्भे। अवतीर्णे च दशमे मासि असूत देवं राज्यवर्धनम्। अथान्यस्मिन् अतिक्रान्ते कस्मिंश्चित् कालांशे गर्भे संबभूव हर्षः। ततः ज्येष्ठामूलीये मासि बहुलपक्षद्वादश्याम् व्यतीते प्रदोषसमये राज्ञो द्वितीयपुत्रजन्मोत्सवो महान् प्रावर्तत। अथ पुनरप्यतिक्रामति काले, धात्रीकराङ्गुलिलग्ने पञ्चषाणि

CC0. In Public Domain. Muthulakshmi Research Academy

पदानि प्रयच्छति हर्षे, षष्ठं वर्षम् अवतरति राज्यवर्धने, देवी यशोवती गर्भेणाधत्त राज्यश्रियम् । पूर्णेषु प्रसव-दिवसेषु प्रसूतवती दुहितरम् । अस्मिन्नेव तु काले देव्याः यशोवत्याः भ्राता सुतमष्टवर्षदेशीयं भण्डिनामानमनुचरं कुमारयोः अर्पितवान् । अवनिपतेश्च तस्योपरि पुत्रयो-स्तुल्यं दर्शनमासीत् । राजपुत्रावपि सकलजीवलोक-हृदयानन्दायिनौ क्रमेण वर्धमानौ यौवनमवतेरतुः । ततश्च मालवराजपुत्रौ कुमारगुप्तमाधवगुप्तौ तयोर-नुचरौ बभूवतुः । अथ राज्यश्रीरपि नृत्यगीतादिषु सकलासु कलासु प्रतिदिनमुपचीयमानपरिचया शनैश्शनैरवर्धत । परिमितैरेव दिवसैः यौवनम् आरुरोह । दूतप्रेषणादि-भिश्च तां ययाचिरे राजानः । राजा तु तां सकलभुवन-नमस्कृते मौखरे वंशे समुत्पन्नस्य अवन्तिवर्मणः सूनवे गृहवर्मणे प्रादात् । विभवानुरूपेषु विवाहमहोत्सवेषु सम्यगुपचरितः ग्रहवर्मा श्वशुरकुले आनन्दमयानि दश दिनानि नीत्वा कथं कथमपि नृपेण विसर्जितः वध्वा सह स्वदेशमगमत् ।

अथ कदाचित् राजा राज्यवर्धनं कवचहरम् आहूय, हूणान् हन्तुम् उत्तरापथं प्राहिणोत् । प्रयान्तञ्च तं देवो

CC0. In Public Domain. Muthulakshmi Research Academy

हर्षः कतिचित् प्रयाणकानि तुरङ्गमैः अनुवव्राज । प्रविष्टे च कैलासप्रभाभासिनीं ककुभं भ्रातरि तुषारशैलोपकण्ठेषु क्रीडन् मृगयाम् कतिपयान्यहानि बहिरेव व्यलम्बत । चकार च स्वल्पीयोभिरेव दिवसैः निश्श्वापदान्यरण्यानि । एकदा तु वासतेय्याः तुरीये यामे प्रत्युषस्येव स्वप्ने दुर्निवारेण दवहुतभुजा दह्यमानं केसरिणम् अद्राक्षीत् । तस्मिन्नेव दावदहने समुत्सृज्य शावकान् उत्प्लुत्य चात्मानम् पातयन्तीम् सिंहीम् अपश्यत् । प्रबुद्धस्य चास्य मुहुर्मुहुर्दक्षिणेतराक्षि पस्पन्दे । गात्रेषु चाकस्मादेव वेपथुः विपप्रथे । अह्नि च तस्मिन् शून्येनैव चेतसा चिक्रीड मृगयाम् । आरोहति च हरितहये मध्यमह्नः, भवनम् आगत्य, साशङ्कः एव तस्थौ ।

अथ दूरादेव लेखगर्भया चीरचीरिकया रचितमुण्डमालम् शून्यहृदयतया समेऽपि वर्त्मनि स्खलन्तम् कुरङ्गकनामानम् आयान्तम् अपश्यत् । स तु कृतप्रणामः समुपसृत्य लेखमुपनिन्ये । तञ्च देवो हर्षः स्वयमेवादायावाचयत् । लेखार्थं गृहीत्वा तमभ्यधात्— —कुरङ्गक ! किं मान्द्यं तातस्येति । स आचचक्षे 'देव ! दाहज्वरो महान्' इति तच्चाकर्ण्य सहसा सहस्रधेवास्य हृदयं पफाल । कृताच-

CC0. In Public Domain. Muthulakshmi Research Academy

मनश्च जनयितुरायुष्कामः आत्मपरिबर्हमशेषम् ब्राह्मण-सादकरोत् । अभुक्त एवारुह्य तुरङ्गमम् एकाकयेव प्रावर्तत । बहुयोजनसंपिण्डितम् अध्वानम् एकेनैवाह्ना समलङ्घयत् । वहन्नेव च निन्ये निशाम् । अन्यस्मिन्नहनि मध्यंदिने स्कन्धावारम् आससाद । क्रमेण च राजद्वारम् आगत्य तुरगादवतीर्णः अभ्यन्तरात् निष्क्रामन्तम् सुषेण-नामानं वैद्यकुमारम् अप्राक्षीत्—'सुषेण ! अस्ति तातस्य विशेषो न वा' इति । सोऽब्रवीत्—'नास्तीदानीम्; यदि भवेत् कुमारं दृष्ट्वा' इति । श्रुत्वैतत् वेपमानहृदयः मन्दं मन्दमवाप तृतीयं कक्षान्तरम् । तत्र च अतिनिश्शब्दे धवलगृहे स्थितम्, शयनीये विचेष्टमानम्, पार्श्वोपविष्टया देव्या यशोवत्या शिरसि वक्षसि स्पृश्यमानम् पितरमद्राक्षीत् ।

अवनिपतिस्तु दूरादेव दृष्ट्वा अतिदयितं तनयं, तदवस्थोऽपि प्रसार्य भुजौ एह्येहीत्याह्वयन् शरीरार्धेन शयनात् उदगात् । ससंभ्रमम्, उपसृतञ्चैनं बलादुरसि निवेश्य, अङ्गैरङ्गानि पीडयन्, कपोलेन कपोलमवघट्टयन्, गाढम् आलिलिङ्ग । कथं कथमपि चिराद्विमुक्तम्, कृतनमस्कारम्, आसीनञ्च शयनान्तिके, विगतनिमेषेण

CC0. In Public Domain. Muthulakshmi Research Academy

चक्षुषा सुचिरं व्यलोकयत् । पस्पर्श च पुनः पुनः वेपथुमता पाणितलेन क्षयक्षामकण्ठञ्च कृच्छ्रादिवावादीत्—'वत्स ! कृशोऽसि' इति । भण्डिस्त्वकथयत्—'देव ! तृतीयमहः कृताहारस्याद्य' इति । तत् श्रुत्वा कथं कथमपि आयतं निश्वस्य उवाच—'वत्स ! जानामि त्वां पितृप्रियम्, त्वज्जन्मनैव कृतार्थोऽस्मि, निरभिलाषोऽस्मि जीवितव्ये, भिषगनुरोधः पाययति माम् औषधम्, अतो नार्हस्यात्मानं शुवे दातुम्, उत्तिष्ठ, कुरु सर्वाः क्रियाः, कृताहारे त्वयि स्वयम् उपयोक्ष्ये पथ्यम्, इति । एवमभिहितस्य चास्य नितरां शोकानलः संदुधुक्षे । क्षणमात्रं स्थित्वा पित्रा पुनराहारार्थमादिश्यमानः धवलगृहात् अवततार । गत्वा स्वधाम विषमयानिव कतिचित् कवलान् अगृह्णात् । आचामंश्च अगृहीतताम्बूल एव सर्वान् आहूय वैद्यान् उपह्वरे 'किं विधेयमधुना' इति विषण्णहृदयः पप्रच्छ । ते तु व्यज्ञापयन्—'देव ! धैर्यमवलम्बस्व । कतिपयैरेव वासरैः स्वस्थं श्रोष्यसि पितरम्' इति । तेषान्तु भिषजां मध्ये अष्टादशवर्षदेशीयः गतः पारम् अष्टाङ्गस्यायुर्वेदस्य, भूभुजा सुतनिर्विशेषं लालितः, रसायनो नाम वैद्यकुमारकः, 'देव ! श्वः प्रभाते यथावस्थितमावेदयितास्मि' इत्यब्रवीत् ।

CC0. In Public Domain. Muthulakshmi Research Academy

गतेषु भिषक्षु क्षतधृतिः क्षपामुखे क्षितिपालसमीपमेव पुनरारुरोह । तत्र च 'दाहो महान्' इत्यादीन् पितुरालापान् अनवरतमाकर्णयन् जाग्रदेव निशामनैषीत् । उषसि चावतीर्य चरणाभ्यामेव स्वमन्दिरमाजगाम । तत्र च त्वरमाणः भ्रातुरागमनार्थं प्रजविनः उष्ट्रपालकान् प्राहिणोत् । अत्रान्तरे 'रसायनो वैद्यकुमारकः दुःखातिरेकेण पावकं प्रविष्टः' इति शुश्राव । तेन च प्लुष्ट इवान्तस्तापेन सर्वाणि कार्याणि विसृज्य शयनीये निपत्य उत्तरीयवाससा सोत्तमाङ्गम् आत्मानम्, अवगुण्ठ्य अतिष्ठत् ।

अन्यस्मिन्नहनि समीपमस्य वेला नाम यशोवत्याः प्रतीहारी आगत्य विज्ञापितवती—'देव ! परित्रायस्व, परित्रायस्व । जीवत्येव भर्तरि किमप्यध्यवसितं देव्या' इति । ततस्तदपरमाकर्ण्य, त्वरमाणः अन्तःपुरमगात् । तत्र च मर्तुम् उद्यतानां राजमहिषीणाम् बहुविधान् आलापान् अशृणोत् । प्रविशन्नेव निर्यान्तीं गृहीतमरणप्रसाधनां प्रत्यग्रस्नानार्द्रदेहां मातरं ददर्श । दूरादेव च वाष्पायमाणदृष्टिः अभ्यधात्—'अम्ब ! त्वमपि मां मन्दपुण्यं त्यजसि । प्रसीद, निवर्तस्व' इत्यभिदधान एव चरणयोः न्यपतत् । देवी तु यशोवती तथा तिष्ठति पादनिहितशिरसि कनीयांसि तनये कृतप्रयत्नापि वाष्पो-

CC0. In Public Domain. Muthulakshmi Research Academy

त्पतनं निवारयितुं न शशाक । दूयमानमानसा किञ्चि-दुत्तानितं वदनेन्दुम् अंशुकप्रान्तेन संछाद्य मुक्तकण्ठम् अतिचिरं प्राकृतप्रमदेव प्रारोदीत् । प्रशान्ते च मन्युवेगे सस्नेहम् उत्थापयामास सुतम् । हस्तेन चास्य प्ररुदितस्य क्षरन्तीं दृष्टिं उन्ममार्ज । स्वयमपि प्रक्षाल्य मुखकमलं वासःशकले शुचिनि समुन्मृज्य पाणी सुतवदननिहितनयना चिरं स्थित्वा पुनः आयतं निश्श्वस्य अवादीत् ।

'वत्स ! नासि न प्रियो निर्गुणो वा । मर्त्तुम् अविध-वैव वाञ्छामि । मरणाच्च मे जीवितमेवास्मिन् समये साहसम् । अतिशीतलः पतिशोकानलादनलः । जीवन्ती-मपि मां न स्प्रक्ष्यन्ति पुत्रराज्यसुखानि । यशसा स्थातुम् इच्छामि लोके, न वपुषा । तदहमेव त्वां प्रसादयामि, न पुनर्मनोरथप्रातिकूल्येन कदर्थनीयास्मि' इत्युक्त्वा पादयोः अपतत् । स तु ससंभ्रमम् अपनीय चरणयुगलम्, अवनमिततनुः उदनमयन्मातरम् । दुर्निवारतां शुचः समवधार्य, कृतनिश्चयां तां ज्ञात्वा, तूष्णीम् अधोमुखोऽ-भवत् । देव्यपि यशोवती परिष्वज्य समाघ्राय शिरसि, निर्गत्य चरणाभ्यामेव अन्तःपुरात् सरस्वतीतीरं गत्वा, तत्र ज्वलितं पावकं प्रविवेश । हर्षोऽपि मातृमरणविह्वलः बन्धुवर्गपरिवृतः पितुः पार्श्वं प्रायात् । अपश्यच्च

CC0. In Public Domain. Muthulakshmi Research Academy

स्वल्पावशेषप्राणवृत्तिम् परिवर्त्यमानतारक जनयितारम् । आश्लिष्यास्य पादपद्मौ विमुक्तारावः चिरं रुरोद । राजा तम् उपरुध्यमानदृष्टिः रुदितशब्देन प्रत्यभिज्ञाय शनैः शनैः 'वत्स ! नार्हस्येवं भवितुम्, कुलप्रदीपोऽसि' इति वदन्नेव अपुनरुन्मीलनाय निमिमील लोचने । अस्मिन्नेवान्तरे पूषापि तेजसा व्ययुज्यत । क्रमेण च प्रवृत्तायां सन्ध्यायां पूर्वस्यां दिशि दृश्यमाने चंद्रमसि नरेन्द्रः सामन्तैः पौरैश्च पुरोहितपुरस्सरैः सरस्वतीं सरितं नीत्वा नरपतिसमुचितायां चितायां हुताशसंस्क्रियया यशःशेषतामनीयत ।

देवोऽपि हर्षः शोकमूकेन राजकुलसम्बद्धेन सकलेन लोकेन परिवृतः निर्व्यवधानायां धरण्याम् उपविष्ट एव तां निशीथिनीम् अखिलां जजागार । कथं कथमपि क्षयमियाय यामिनी । अथास्तमुपगते शशिनि, दिवमारूढे सवितरि, राजकुलात् निर्जगाम । अगाच्च सरस्वतीतीरम् । तस्यां स्नात्वा पित्रे ददावुदकम् । अपस्नातश्च अनिष्पीडितमौलिरेव निःश्वासपरः निरातपत्रः चरणाभ्यामेव भवनमाजगाम । अथ पितृशोकविह्वलीकृतम्, सर्वासु क्रियासु विमुखं देवं हर्षम् श्रुतिस्मृतीतिहासविशारदाः द्विजातयः, अधिगतात्मतत्त्वाः मस्करिणः,

CC0. In Public Domain. Muthulakshmi Research Academy

समदुःखसुखा मुनयः, संसारासारत्वकथनकुशला ब्रह्मवादिनः, शोकापनयननिपुणाश्च पौराणिकाः, पर्यवारयन् । अनुनीयमानश्च तैः कथं कथमपि आहारादिकासु क्रियास्वाभिमुख्यम् अभजत । अथ 'तातस्य मरणम् उपश्रुत्यार्यः कथं भविष्यति' इति भ्रातरमेवानुचिन्तयन् तदागमनमुदीक्षमाणः तस्थौ ।

अथ प्रथमप्रेतपिण्डभुजि भुक्ते द्विजन्मनि, गतेष्वशौचदिवसेषु, नीतेषु तीर्थस्थानानि कीकसेषु, वनाय विसर्जिते राजगजेन्द्रे, क्रमेण च मन्देष्वाक्रन्देषु, काव्यावशेषनाम्नि नरनाथे, देवो हर्षः अवनतमूकमुखेन बन्धुवर्गेणावेष्ट्यमानः बहुवासरान्तरितस्नानभोजनादिना परिजनेन परिवृतम्, अतिकृशैरवयवैरावेद्यमानदुःखभारम्, प्रथीयसा बाष्पपयः प्रवाहेण महीम् अनवरतं सिञ्चन्तम्, दुःखक्षामौ कपोलौ उद्वहन्तम् ज्येष्ठं भ्रातरम् आयान्तम् अपश्यत् । दूरादेव दृष्ट्वा देवो राज्यवर्धनः सुदूरप्रसारितेन दीर्घेण दोर्दण्डद्वयेन गृहीत्वा कण्ठे मुक्तकण्ठं रुरोद । सुचिराच्च कथं कथमपि निर्वृष्टनयनजलः पर्जन्य इव शरदि स्वयमेवोपशशाम । उपविष्टश्च परिजनोपनीतेन तोयेन चक्षुः अक्षालयत् । ताम्बूलिकोपस्थापितेन वाससा

CC0. In Public Domain. Muthulakshmi Research Academy

वदनम् उन्ममार्ज। तूष्णीमेव च चिरं स्थित्वोत्थाय स्नान-भूमिमगात्। स्नात्वा च विस्रस्तकुन्तलं मौलिम् अनादरात् निष्पीड्य, चतुश्शालवितर्दिकायां विनिहितैकोपबर्हायाम् पर्यङ्किकायां निपत्य जोषम् अस्थात्। देवोऽपि हर्षः तथैव स्नात्वा धरणितलनिहितायां कुथायां प्रसारितमूर्तिः अदूर एवास्य तूष्णीमेव समवातिष्ठत।

अथ सर्वेषु प्रविष्टेषु राजसु राज्यवर्धनो हर्षदेवमुवाच-- 'तात! भूमिरसि गुरुनियोगानाम्। भवन्तम् एवंविधं विधेयं किमपि विभणिषति मे हृदयम्। बालभावसुलभा वामता नालम्बनीया। मा कृथाः प्रत्यूहम् ईहितेऽस्मिन्। न खलु न जानासि लोकवृत्तम्। मान्धातरि मृते किं कृतं पुरुकुत्सेन, दिलीपे रघुणा, दशरथे रामेण, दुष्यन्ते भरतेन। तिष्ठन्तु तावदेते। तातेनैव पितरि परासुतां गते किं नाकारि राज्यम्। यं किल शोकः समभिभवति तं कापुरुषम् आचक्षते शास्त्रविदः। स्त्रियो हि विषयः शुचाम्। तथापि किं करोमि। आस्पदं पितृशोकहुतभुजो जातोऽस्मि। मम हि, भूभृति पर्यस्ते प्रणष्टं प्रज्ञानम्। विलीनं धैर्यम्। वर्धन्ते दुःखानि। सोऽहमिच्छामि मनसि लग्नं स्नेहमलमिदं प्रस्रवणाम्बुभिः क्षाल-

CC0. In Public Domain. Muthulakshmi Research Academy

यितुम् आश्रमपदे । तदाज्ञया गुरोः गृहाण मे राज्य-चिन्ताम् । परित्यक्तं मया शस्त्रम्' इत्यभिधाय खड्ग-ग्राहिणो हस्तात् आदाय निजं निस्त्रिंशम् उत्ससर्ज धरण्याम् । तत् श्रुत्वा देवो हर्षः समचिन्तयत् । 'किं नु खलु मामन्तरेणार्यः कुपितः स्यात् । उतानया दिशा परीक्षितुकामो माम् । येनायं माम् अतिदुष्करे कर्मणि समादिष्टवान् । किं चास्य विस्मृताः सौमित्रिवृकोदर-प्रभृतयः । किं वा ममानेन वृथा विकल्पितेन । तूष्णीमेवा-र्यमनुगमिष्यामि । गुरुवचनातिक्रमकृतञ्च किल्विषम् एतत् तपोवने तप एवापास्यति' इत्यवधार्य मनसा प्रथमतरं गतस्तपोवनं तूष्णीमवातिष्ठत ।

अत्रान्तरे राज्यश्रियः परिचारकः संवादको नाम सहसैव प्रविश्य विमुक्ताक्रन्दः सदस्यात्मानम् अपातयत् । सम्भ्रान्तो राज्यवर्धनस्तं पर्यपृच्छत्—'भद्र भण, किं व्यसनम् अधिकतरम् इतः समुपनयति विधिः' इति । स कथं कथमप्यकथयत् 'देव ! यस्मिन्नहन्यवनिपतिरुपरतः इत्यभूद्वार्त्ता, तस्मिन्नेव दिने देवो ग्रहवर्मा दुरात्मना माल-वराजेन जीवलोकं त्याजितः । भर्तृदारिकापि राज्यश्रीः कालायसनिगडसंयतचरणा कान्यकुब्जे कारायां निक्षिप्ता । किंवदन्ती च 'स दुर्मतिः एतामपि भूमिं जिघृक्षुराजिग-

CC0. In Public Domain. Muthulakshmi Research Academy

मिषति' इति । ततश्च तादृशम् आकस्मिकम् अपरं व्यतिकरम् आकर्ण्य स्वसुः स्नेहात् एकपदे एवास्य ननाश शोकावेगः । विवेश च सहसा गभीरं हृदयं भयंकरः कोपावेगः मालवोन्मूलनाय भीषणं कृपाणं पाणिना जग्राह । अनुजम् एवम् अवादीत्--'आयुष्मन् ! इदं राजकुलम् । अमी बान्धवाः । परिजनोऽयम् । इयं भूमिः । एताः प्रजाः । गतोऽहम् अद्यैव मालवकुलप्रलयाय । अन्तरितः शोको मे महीयसा मन्युना । तिष्ठन्तु सर्व एव राजानः करिणश्च त्वयैव सार्धम् । अयमेको भण्डिः अयुतमात्रेण तुरङ्गमाणाम् अनुयातु माम् । तिष्ठतु भवान्' इत्यभिधाय तस्मिन्नेव वासरे निजगामाभ्यमित्रम् । अथ तथागते भ्रातरि, उपरते च पितरि, प्रोषितजीविते जामातरि, मृतायाञ्च मातरि, संयतायाञ्च स्वसरि, स्वयूथभ्रष्ट इव वन्यः करी देवो हर्षः कथं कथमपि एकाकी कालं तम् अनैषीत् ।

अतिक्रान्तेषु बहुषु वासरेषु कदाचित् भ्रातृगमनदुःखेन दूयमानहृदयः प्रक्षीणभूयिष्ठायां क्षपायां क्षणमिव निद्राम् अलभत । स्वप्ने अभ्रंलिहं लोहस्तम्भं भज्यमानम् अपश्यत् । कम्पमानहृदयश्च पुनः प्रत्यबुध्यत ।

CC0. In Public Domain. Muthulakshmi Research Academy

अचिन्तयच्च 'किं नु मामेवममी सततम् अनुबध्नन्ति दुःस्वप्नाः। स्फुरति च दिवानिशम् अदक्षिणम् अक्षि। सुदारुणाः क्षितिपक्षयम् आचक्षाणाः क्षणमपि न शाम्यन्ति पुनरुत्पाताः। दिने दिने दिशां दाहाः दृश्यन्ते। नित्यं नभस्तलात् निपतति तारागणः। न कुशलमिव पश्यामि लग्नस्य। सर्वथा स्वस्ति भवत्वार्याय' इति चिन्तयित्वा भ्रातृस्नेहकातरं हृदयं कथंकथमपि संस्तभ्य उत्थाय क्रियाकलापम् अकार्षीत्। आस्थानगतश्च सहसैव प्रविशन्तम् राज्यवर्धनस्य प्रसादभूमिम्[1] कुन्तलं नाम बृहदश्ववारं ददर्श। तस्माच्च गौडाधिपेन मिथ्योपचारैः उपचितविश्वासं मुक्तशस्त्रम् एकाकिनं स्वभवन एव भ्रातरं व्यापादितम् अश्रौषीत्। श्रुत्वा च महातेजस्वी प्रचण्डेन कोपेन सहसैव प्रजज्वाल। ततश्च रोषितो महाशीविष इव परां भीषणताम् अयासीत्। अवादीच्च 'अनार्यं गौडाधिपम् अपहाय क एव सर्वलोकविगर्हितं कर्म कुर्यात्। कां नु गतिं गमिष्यति? कां वा योनिं प्रवेक्ष्यति? कस्मिन् वा नरके निपतिष्यति? गृह्णतोऽस्य नाम पापेन लिप्यत इव मे जिह्वा। क्वेदानीं यास्यति दुर्बुद्धिः। जीवति जाल्मे जगद्विगर्हिते गौडाधिपचाण्डाले जिह्रेमि

१—कृपापात्रम्

CC0. In Public Domain. Muthulakshmi Research Academy

प्रतीकारशून्यं शुचा सूत्कर्तुम् । तत् श्रूयतां मे प्रतिज्ञा। 'यदि परिगणितैरेव वासरैः निर्गौडां न करोमि मेदिनीम् ततस्तनूनपाति पातयाम्यात्मानम्' इति कृतनिश्चयश्च विसर्जितराजलोकः सभामत्याक्षीत् । उत्थाय च निश्शेषमाह्निकम् अकार्षीत् ।

अथापरेद्युः प्रभातायां शर्वर्याम् प्रातरेव प्रतीहारम् आदिदेश । गजसाधनाधिकृतं स्कन्दगुप्तं द्रष्टुमिच्छामीति । अथ युगपत् प्रधावितैः बहुभिः पुरुषैः आहूयमानः स्कन्दगुप्तः चरणाभ्यामेव संभ्रान्तो विवेश राजकुलम् । दूरादेव च स्पृशन्मौलिना महीतलं नमस्कारम् अकरोत् । उपविष्टं नातिनिकटे तं जगाद देवो हर्षः । 'श्रुतो विस्तर एवास्य आर्यव्यतिकरस्य अस्मच्चिकीर्षितस्य च । अतः शीघ्रं प्रवेश्यन्तां प्रचारनिर्गतानि गजसाधनानि । न क्षाम्यत्यतिस्वल्पमपि प्रयाणविलम्बम् आर्यपरिभवपीडापावकः' इत्येवम् अभिहितश्च स्कन्दगुप्तः प्रणम्य 'कृतम् अवधारयतु स्वामी समादिष्टम्' इति विज्ञाप्य स्वाम्यादेशसंपादनाय निर्जगाम । देवोऽपि हर्षः कृतप्रतिज्ञः दिशां विजयाय प्रयाणं समादिदेश । तदानीं प्रतिसामन्तानाम् उदवसितेषु बहुरूपाणि दुर्निमित्तानि

CC0. In Public Domain. Muthulakshmi Research Academy

प्रादुरभवन् । तथाहि । प्रत्यजिरं मधुसरघासङ्घाताः जह्लादिरे । वासरेऽपि विरसं विरेसुः अशिवाः शिवाः । उद्यानपादपाः अकालकुसुमानि दधुः । चामराण्यकस्मादपतन् चेटीपाणिपल्लवात् । उपतोरणम् उन्मुखः कौलेयकगणः निष्कारणम् अकाणीत् । शूराणां शरीरेषु शोणितवृष्टयो निपेतुः । नभस्तलात् उल्कादण्डाः न्यपतन् । भूमयः चकम्पिरे । बभ्राम वात्या इति ।

अथ व्यतीतेषु केषुचित् दिवसेषु, मौहूर्तिकमण्डलेन सुगणिते सुप्रशस्तेऽहनि, स्नात्वा, भगवतो नीललोहितस्यार्चां विरचय्य, प्रदक्षिणार्चिषम् आशुशुक्षणि हुत्वा, द्विजेभ्यो रत्नानि गाश्च सहस्रशो दत्त्वा, भवनात् निर्जगाम । नातिदूरे च नगरात् उपसरस्वति निर्मिते महति तृणमये मन्दिरे प्रस्थानमकरोत् । निनाय च तत्र तं दिवसम् । प्रतिपन्नायां शर्वर्याम् अखिलं राजलोकं सम्मान्य सुष्वाप । अथ गलति तृतीये यामे गम्भीरध्वनिः अताडयत प्रयाणपटहः । सद्य एव प्रतिदिशम् आगच्छद्भिः राजभिः आपुपूरे राजद्वारम् । उदिते च भगवति दिनकृति राज्ञः समायो समयशंसी सस्वान संज्ञाशङ्खः । अथ न चिरादिव करेणुकयोह्यमानः नरपतिः दण्डिभिः इतस्ततः समुत्सार्यमाण-

CC0. In Public Domain. Muthulakshmi Research Academy

जनसमूहः निर्जगाम । अथ कटकं गत्वा, स्वावासम् आसाद्य, करेणुकातोऽवतीर्य, सबहुमानं विसर्जितराजलोकः बाह्ये आस्थानमण्डपे स्थापितम् आसनम् आचक्राम । प्रास्त-समायोगश्च क्षणम् आसिष्ट ।

अथ तत्र प्रतीहारः प्रविश्य विज्ञापितवान् –'देव ! प्राग्ज्योतिषेश्वरेण कुमारेण प्रहितः हंसवेगनामा दूतः तोरणम् अध्यास्ते' इति । राजा तु तम् 'आशु प्रवेशय' इति आदिदेश । अथ प्रतीहारः स्वयमेव निर्गत्य हंसवेगं प्रवेशयामास । सोऽपि प्रभूतप्राभृतभृतां पुरुषाणां समूहेन अनुगम्यमानः प्रविवेश राजमन्दिरम् । आरादेव च पञ्चा-ङ्गालिङ्गिताङ्गणः प्रणामम् अकरोत् । 'एह्येहि' इति सबहुमानम् आहूतः सविनयम् उपसृत्य स्निग्धया नरेन्द्र-दृष्ट्या निर्दिष्टम् अविप्रकृष्टं प्रदेशम् अध्यास्त । ततो राजा तं पप्रच्छ 'हंसवेग ! श्रीमान् कञ्चित् कुशली कुमारः' इति । स प्रत्यवादीत् 'अद्य कुशलम् । येनैवं सौहार्दार्द्रया गिरा पृच्छति देवः' इति । स्थित्वा च मुहूर्तं पुनरुवाच––'समस्तभूतिभाजनभूतस्य देवस्यानुरूपं प्राभृ-तमेव दुर्लभं लोके । तथाप्यस्मत्स्वामिना संदेशम् अशू-न्यतां नयता पूर्वजोपार्जितं वारुणातपत्रम् आभोगाख्यम् अनुरूपस्थानन्यासेन कृतार्थीकृतम् । अस्य च बहून्या-

CC0. In Public Domain. Muthulakshmi Research Academy

श्चर्याणि दृश्यन्ते । प्रतिदिवसं छायायाः शैत्यहेतोः एकैकः सोमस्य रश्मिः एनं प्रविशति । अस्मिन् प्रविष्टे मणिशलाकाभ्यः यावदिच्छम् अम्भसाम् अच्छाः धाराश्च्योतन्ति । प्रचेता इव यश्चतुर्णाम् अर्णवानाम् अधिपतिः भूतो भावी वा तम् अनुगृह्णाति छायया नेतरम् । इदं च न सप्तार्चिः दहति । न पृषदश्वो हरति । नोदकम् आर्द्रयति । न रजांसि मलिनयन्ति । एतत्तावदनुगृह्णातु दृशा देवः । संदेशमपि पश्चात् श्रोष्यति', इत्यभिधाय निवृत्यात्मीयं पुरुषम् अभ्यधात् । 'उत्तिष्ठ, दर्शय देवस्य' इति ।

स वचनानन्तरम् उत्थाय पुमान् ऊर्ध्वीकृत्य तत् निचोलकादकोषीत् । चित्रीयमाणचेताः स राजा शेषफणिफणामण्डलमिव अतिसितमहः तत् त्रैलोक्याद्भुतं महच्छत्रं सादरम् ऐक्षिष्ट । दृष्टे च तस्मिन् राज्ञा प्रथमं, शेषमपि प्राभृतं प्रकाशयाञ्चक्रुः क्रमेण कार्माः । तद्यथा । आहतलक्षणान् अलंकारान् । शौचक्षमाणि क्षौमाणि । पानभाजनानां निचयान् । वेत्रमयान्यासनानि । सुभाषितभाञ्जि पुस्तकानि । लवङ्गपुष्पमञ्जरीणां जातीफलस्तबकानाञ्च राशीन् । बहुसुभाषित-

CC0. In Public Domain. Muthulakshmi Research Academy

जल्पाकजिह्वांश्च शुकशारिकाप्रभृतीन् पक्षिणः । प्रवाल-पञ्जरगतांश्च चकोरान् । इति राजा तु छत्रदर्शनात् प्रहृष्टहृदयः प्रथमप्रयाणे शोभनं निमित्तमिति मनसा जग्राह । अपनीते च तस्मात् प्रदेशात् प्राभृतसंभारे क्षण-मिव स्थित्वा 'हंसवेग ! विश्राम्यताम्,' इति प्रतीहार-भवनं विसर्जयाम्बभूव । स्वयमप्युत्थाय स्नात्वा मङ्ग-लाकांक्षी प्राङ्मुखः प्राविशदाभोगस्य छायाम् । अथ विशत एवास्य छायाजन्मना जाडिम्ना हृदयम् अतिशि-शिरम् अभवत् । जातविस्मयश्चाकरोन्मनसि, 'एकम-जयं संगतमपहाय कास्त्यन्या प्रतिकौशलिका' इति । आहारकाले च हंसवेगाय चन्दनं वाससी कटिसूत्रं कर्णा-भरणं प्रभूतं भोग्यजातञ्च प्राहिणोत् ।

ततः क्रमेण भगवति सहस्रांशौ वारुणीं दिशं प्रयाते, स्फुरति सन्ध्यारागे, विततवितानतलवर्ती नरेन्द्रः 'यात तावत्,' इति विसर्ज्यानुजीविनः हंसवेगमादिष्टवान्, 'कथय संदेशम्' इति । प्रणम्य स कथयितुं प्रास्तावीत् । 'देव ! पुरा वराहसंपर्कसंभूतगर्भया भगवत्या भुवा नरको नाम सूनुः असावि । रसातले स च वरुणस्य सकाशात् इदम् आतपत्रम् अहार्षीत् । तस्यान्वये स्थितिवर्मणः पुत्रः सुस्थिरवर्मा नाम राजा जज्ञे । यं मृगाङ्क इति जना जगुः ।

CC0. In Public Domain. Muthulakshmi Research Academy

तस्य च श्यामादेव्यां भास्करवर्मा कुमारः समभवत् । अयमस्य शैशवादारभ्य संकल्पः स्थेयान् । स्थाणुपादारविन्दद्वयादृते नान्यं नमस्कुर्यामिति । ईदृशश्चायं मनोरथः त्रयाणामन्यतमेन संपद्यते । सकलभुवनविजयेन वा मृत्युना वा देवोपमेन मित्रेण वेति । तत् प्राग्ज्योतिषेश्वरः देवेन सह अजर्यं संगतम् इच्छति । यदि देवस्यापि मैत्रीयति हृदयम्, ततः समाज्ञाप्यताम्, अनुभवतु देवस्य गाढोपगूढानि कामरूपाधिपतिः । नाभिनन्दति चेत् देवः प्रणयम्, आज्ञापयतु किं कथनीयम् मया स्वामिनः' इति । विरतवचसि तस्मिन् भूपालः सबहुमानं जगाद–'हंसवेग ! कथमिव तादृशि महात्मनि स्निह्यति मद्विधस्य अन्यथा प्रवर्तते मनः । श्रेयांश्च संकल्पः कुमारस्य । स्वयं बाहुशाली मयि च सुहृदि, हरादृते कमन्यं नमस्यति । तत् यथा यतेथाः, यथा न चिरमियमस्मान् क्लेशयति कुमारदर्शनोत्कण्ठा' इति । हंसवेगस्तु, 'कतिपयैरेव दिवसैः परागतः प्राग्ज्योतिषेश्वरः इति करोतु देवश्चेतसि', इत्युक्त्वा नमस्कृत्य निर्जगाम । राजापि रजनीं कुमारदर्शनोत्सुकः समनैषीत् । प्रभाते च प्रभूतं प्राभृतं दत्त्वा हंसवेगं प्राहिणोत् स्वयमपि अनवरतैः प्रयाणकैः अभ्यमित्रं प्रावर्तत ।

CC0. In Public Domain. Muthulakshmi Research Academy

जल्पाकजिह्वांश्च शुकशारिकाप्रभृतीन् पक्षिणः । प्रवाल-पञ्जरगतांश्च चकोरान् । इति राजा तु छत्रदर्शनात् प्रहृष्टहृदयः प्रथमप्रयाणे शोभनं निमित्तमिति मनसा जग्राह । अपनीते च तस्मात् प्रदेशात् प्राभृतसंभारे क्षण-मिव स्थित्वा 'हंसवेग ! विश्राम्यताम्,' इति प्रतीहार-भवनं विसर्जयाम्बभूव । स्वयमप्युत्थाय स्नात्वा मङ्ग-लाकांक्षी प्राङ्मुखः प्राविशदाभोगस्य छायाम् । अथ विशत एवास्य छायाजन्मना जाडिम्ना हृदयम् अतिशि-शिरम् अभवत् । जातविस्मयश्चाकरोन्मनसि, 'एकम-जयं संगतमपहाय कास्त्यन्या प्रतिकौशलिका' इति । आहारकाले च हंसवेगाय चन्दनं वाससी कटिसूत्रं कर्णा-भरणं प्रभूतं भोग्यजातञ्च प्राहिणोत् ।

ततः क्रमेण भगवति सहस्रांशौ वारुणीं दिशं प्रयाते, स्फुरति सन्ध्यारागे, विततवितानतलवर्ती नरेन्द्रः 'यात तावत्,' इति विसर्ज्यानुजीविनः हंसवेगमादिष्टवान्, 'कथय संदेशम्' इति । प्रणम्य स कथयितुं प्रास्तावीत् । 'देव ! पुरा वराहसंपर्कसंभूतगर्भया भगवत्या भुवा नरको नाम सूनुः असावि । रसातले स च वरुणस्य सकाशात् इदम् आतपत्रम् अहार्षीत् । तस्यान्वये स्थितिवर्मणः पुत्रः सुस्थिरवर्मा नाम राजा जज्ञे । यं मृगाङ्क इति जना जगुः ।

CC0. In Public Domain. Muthulakshmi Research Academy

तस्य च श्यामादेव्यां भास्करवर्मा कुमारः समभवत् । अयमस्य शैशवादारभ्य संकल्पः स्थेयान् । स्थाणुपादारविन्दद्वयादृते नान्यं नमस्कुर्यामिति । ईदृशश्चायं मनोरथः त्रयाणामन्यतमेन संपद्यते । सकलभुवनविजयेन वा मृत्युना वा देवोपमेन मित्रेण वेति । तत् प्राग्ज्योतिषेश्वरः देवेन सह अजर्यं संगतम् इच्छति । यदि देवस्यापि मैत्रीयति हृदयम्, ततः समाज्ञाप्यताम्, अनुभवतु देवस्य गाढोपगूढानि कामरूपाधिपतिः । नाभिनन्दति चेत् देवः प्रणयम्, आज्ञापयतु किं कथनीयम् मया स्वामिनः' इति । विरतवचसि तस्मिन् भूपालः सबहुमानं जगाद–'हंसवेग ! कथमिव तादृशि महात्मनि स्निह्यति मद्विधस्य अन्यथा प्रवर्तते मनः । श्रेयांश्च संकल्पः कुमारस्य । स्वयं बाहुशाली मयि च सुहृदि, हरादृते कमन्यं नमस्यति । तत् यथा यतेथाः, यथा न चिरमियमस्मान् क्लेशयति कुमारदर्शनोत्कण्ठा' इति । हंसवेगस्तु, 'कतिपयैरेव दिवसैः परागतः प्राग्ज्योतिषेश्वरः इति करोतु देवश्चेतसि', इत्युक्त्वा नमस्कृत्य निर्जगाम । राजापि रजनीं कुमारदर्शनोत्सुकः समनैषीत् । प्रभाते च प्रभूतं प्राभृतं दत्त्वा हंसवेगं प्राहिणोत् स्वयमपि अनवरतैः प्रयाणकैः अभ्यमित्रं प्रावर्तत ।

CC0. In Public Domain. Muthulakshmi Research Academy

कदाचित् राज्यवर्धनभुजबलोपार्जितम् अशेषं मालवराजसाधनमादाय भण्डिः राजद्वारम् आगत्य तुरङ्गमात् अवतीर्य अवनतमुखो विवेश राजमन्दिरम् । दूरादेव विमुक्ताक्रन्दः पपात पादयोः । अवनिपतिस्तु दृष्ट्वा तम् अभिनवीभूतभ्रातृशोकहुताशनः प्रत्युद्गम्य उत्थाप्य, गाढम् उपगुह्य कण्ठे करुणम् अतिचिरं रुरोद । शिथिलीभूतमन्युवेगश्च पुनरागत्य निजासने निषसाद । अथ प्रक्षालितमुखः भ्रातृमरणवृत्तान्तम् अप्राक्षीत् । अकथयच्च यथावृत्तमखिलं भण्डिः । अथ नरपतिस्तमुवाच —'राज्यश्रीव्यतिकरः कः ?' इति । स पुनरवादीत्— 'देव ! देवभूमिगते देवे राज्यवर्धने देवी राज्यश्रीः परिभ्रश्य बन्धनात् विन्ध्याटवीं सपरिवारा प्रविष्टेति, लोकतो वार्तामश्रृणवम् । अन्वेष्टारस्तु तां प्रति प्रभूताः प्रहिताः नाद्यापि निवर्तन्त' इति । तच्चाकर्ण्य भूपतिरब्रवीत् 'किमन्यैरनुपदिभिः । यत्र सा तत्र स्वयमहं यास्यामि । भवानपि कटकम् आदाय प्रवर्ततां गौडाभिमुखम्' इत्युक्त्वा चोत्थाय स्नानभुवम् अगात् । स्नातेन भण्डिना सार्धम् अभुक्त । निनाय च तेनैव सह वासरम् ।

अथापरेद्युरुषस्येव भण्डिः भूपालमुपसृत्य व्यज्ञापयत् । 'पश्यतु श्रीराज्यवर्धनभुजबलोपार्जितं साधनं

CC0. In Public Domain. Muthulakshmi Research Academy

मालवराजस्य' इति । नरपतिना सः 'एवं क्रियताम्' इत्यनुज्ञातः दर्शयांबभूव । तद्यथा । अनेकसहस्रसंख्यान् करिणः, हरिणरंहसो हरीन्, तारान् हारान् शुचीनि बाल-व्यजनानि, जातरूपमयनालं श्वेतातपत्रम्, अप्सरस्तुल्याः वारविलासिनीः; सिंहासनप्रभृतीनि राज्योपकरणानि इति । तत्सर्वम् अवनिपालः स्वीकर्तुं यथाधिकारम् आदिक्षत् अध्यक्षान् ।

अन्यस्मिंश्चाहनि स्वसारम् अन्वेष्टुम् उच्चचाल । परिमितैरेव प्रयाणकैः अवाप विन्ध्याटवीम्, आट च तस्याम् इतश्चेतश्च सुबहून् दिवसान् । एकदा तु आट-विकसामन्तस्य शरभकेतोः सूनुः व्याघ्रकेतुः कज्जल-श्यामलं कञ्चन शबरयुवानम् आदाय आगत्य विज्ञाप-यामास--'देव ! सर्वस्यास्य विन्ध्यस्य स्वामी शबर-सेनापतिः भूकम्पो नाम, तस्यायं निर्घातनामा स्वस्त्रीयः सकलस्यास्य विन्ध्यारण्यस्याभिज्ञः । एनं पृच्छतु देवः' इति अवनिपतिस्तमप्राक्षीत्-'अङ्ग ! अभिज्ञा यूयमस्य सर्वस्योद्देशस्य । सेनापतेर्वान्यस्य वा कस्यचिदुदाररूपा नारी दर्शनगोचरम् आगता भवेत्' इति । निर्घातस्तु प्रणम्य व्यज्ञापयत्--देव ! नैवंरूपा काचिदबला दृष्टा । देवादेशादिदानीम् अन्वेषणं प्रति यत्नः क्रियते । इत-

CC0. In Public Domain. Muthulakshmi Research Academy

श्चार्धगव्यूतिमात्रे महति महीरुहां षण्डे दिवाकरमित्र-नामा पाराशरी प्रतिवसति । स 'यदि विन्देद्वार्ताम्' इति । नरपतिरब्रवीत् 'अङ्ग, समुपदिश तमुद्देशम् यत्रास्ते सः' इति । इत्येवमुक्त्वा तेनैवोपदिश्यमानवर्त्मा चरणाभ्या-मेव गत्वा महतस्तरुषण्डस्य मध्यभागे कृतावस्थानं स्वर्गतस्य ग्रहवर्मणो बालमित्रं सौगतमते गृहीतकाषायम् मध्यमे वयसि वर्तमानं दिवाकरमित्रम् अद्राक्षीत् । अति-प्रशान्तगम्भीराकारं तं दूरादेव शिरसा ववन्दे ।

दिवाकरमित्रस्तु भूपतेराकारविशेषेण सञ्जात-बहुमानः ससंभ्रमम् अभ्युत्थाय गुरुमिवाभ्यागतं स्वागत-गिराभिनन्द्य स्वेनासनेन आध्वमत्र, इति निमन्त्रया-ञ्चकार । पार्श्वस्थितञ्च शिष्यम् अब्रवीत्—'आयुष्मन्! उपनय कमण्डलुना पादोदकमिति ।' राजा बभाषे—'भवादृशां दर्शनमेव परमं पावनम् । तदलं पाद्येन । आसतां भवन्तो यथासुखम्', 'आसीनोऽहम्' इत्यभिधाय क्षितावेवोपाविशत् । स्वमेवासनं भेजे भदन्तः । भूपति-मुखनिहितनयनः मुहूर्तमिव स्थित्वा अवादीत्—'पुण्य-वतः कथंचित् प्राप्तस्य भवतः केन प्रियं समाचरामः इति पारिप्लवं चेतो नः । यदि कथनीयं तत् कथयतु भवान् । केन कृत्येन भव्यो भूषितवान् भूमिमिमाम् ।

CC0. In Public Domain. Muthulakshmi Research Academy

कस्माच्च संतप्तरूपेव ते तनुरियं विभाव्यते' इति। राजा जगाद--'आर्य ! मधुरे वचसैव ते सर्वम् अनुष्ठितम्। धन्योऽस्मि। मम हि विनष्टनिखिलेष्टबन्धोः जीवितानुबन्धनिबन्धनम् कैव यवीयसी स्वसावशेषा। सापि भर्तुः वियोगात् वैरिपरिभवभयात् भ्रमन्ती विंध्यवनमिदमविशत्। अतः तामन्वेष्टुं वयमिमामटवीमटामः। कथयतु गुरुरपि यदि कदाचित् श्रुतिपथम् उपगतेति' तत् श्रुत्वा भदन्तः पुनरभ्यधात्। 'धीमन्, न खलु कश्चिदेवंविधो वृत्तान्तोऽस्मानुपगतवान्' इति।

तदानीम् अकस्मादागत्य अपरो भिक्षुः अभाषत--'भगवन् भदन्त ! महत्करुणं वर्तते। बाला कल्याणरूपा स्त्री वैश्वानरं विशति। संभावयतु तां भगवान्' इति। राजा तु जातानुजाशङ्कः पप्रच्छ--'पाराशरिन् ! कियद् दूरे सा, आकारतो वा कीदृशी ? पृष्टा वा त्वया कासि, कस्यासीत्यादि ?' इति। भिक्षुराचचक्षे--महाभाग ! श्रूयताम्। अहं हि प्रत्युषस्येवाद्य वन्दित्वा भगवन्तम् अनेनैव नदीतीरेण विहृतवानतिदूरम्। एकस्मिंश्च वनलतागहने नारीणां रुदितम् आकर्णितवानस्मि। गतस्तं प्रदेशं दृष्टवानस्मि बह्वीभिरबलाभिः परिवृतां क्षामक्षामां मरणे कृतनिश्चयां योषितम्। सा तु समीपगते मयि तदवस्थापि

CC0. In Public Domain. Muthulakshmi Research Academy

सबहुमानम् आनतमौलिः प्रणतवती । तस्मात् स्त्रैणात् अन्यतरा योषिदागत्य माम् अभिहितवती । 'भगवन् ! इयं नः स्वामिनी, मरणेन पितुः, अभावेन भर्तुः, प्रवासेन भ्रातुः, भ्रंशेन शेषस्य बान्धववर्गस्य, निरवलम्बना, परिभवेन अरातिकृतेन कदर्थिता, दारुणं दुःखम् अपारयन्ती सोढुम्, अग्निं प्रविशति, परित्रायताम्', इति । अहमभिहितवान्--'आर्ये गिरामगोचरोऽयमस्याः शोकः । मम गुरुरपर इव सुगतः समीपगत एव । कथिते मयास्मिन् उदन्ते नियतम् आगमिष्यति । सौगतैः सुभाषितैः एनां प्रबोधपदवीम् आरोपयिष्यति' इति । तच्च 'श्रुत्वा त्वरतामार्य' इत्यभिदधाना पुनरपि पादयोः पतितवती । 'सोऽहमुपगम्य त्वरमाणः व्यतिकरमिमं गुरवे निवेदितवान्' इति । अथ भूभृत् 'नियतं सैवेयं मम भगिनी' इत्युक्त्वा श्रमणमभ्यधात् । 'आर्य ! उत्तिष्ठ, दर्शय क्वासौ' इति भाषमाण एव उत्तस्थौ ।

अथ समस्तशिष्यवर्गानुगतेन आचार्येण अनुगम्यमानः पद्भ्यामेव तं प्रदेशं प्रावर्तत । लतावनान्तरितस्य महतः स्त्रैणस्य मुमूर्षोः अनेकप्रकारान् आलापान् श्रुत्वा सत्वरम् उपसर्पन् अग्निप्रवेशायोद्यतां राज्यश्रियं ददर्श । आललम्बे च हस्तेन तस्याः ललाटम् । असंभावितागम-

CC0. In Public Domain. Muthulakshmi Research Academy

नस्य सहसा प्राप्तस्य भ्रातुः कण्ठे समाश्लिष्य दुःखसंभारेण विलोचनाभ्यां स्थूलस्थूलम् अश्रुप्रवाहम् उत्सृजन्ती राज्यश्रीः सुचिरं रुरोद । प्रशान्ते च मन्युवेगे वह्नेः समीपात् आक्षिप्य भ्रात्रा नीता निकटवर्तिनि तरुतले निषसाद । अथ नरेन्द्रः भदन्तशिष्योपनीतेन उदके स्वसुः आत्मनश्च मुखम् अक्षालयत् । ततोऽब्रवीत् स्वसारम्--'वत्से ! वन्दस्वात्रभवन्तं भदन्तम् । एष ते भर्तुः द्वितीयं हृदयम् अस्माकञ्च गुरुरिति' । राजवचनात्तु सा पतिपरिचयश्रवणेन पुनरानीतबाष्पा प्रणनाम । आचार्यः किञ्चित् परावृत्तनयनः दीर्घं निश्वास । स्थित्वा च क्षणमेकं किञ्चित् मधुरया वाचा व्याजहार--'कल्याणराशे ! अलं रुदित्वा । क्रियतां स्नानविधिः' इति । अथ भूपतिः उत्थाय स्नात्वा गिरिसरिति, शुचा परवतीं प्रयत्नप्रतिपन्नभोजनां, प्रथमम् अभोजयत् । अनन्तरश्च स्वयम् आहारस्थितिम् अकरोत् । भुक्तवांञ्च बन्धनात् प्रभृति विस्तरतः स्वसुः सर्वं व्यतिकरं परिजनतः शुश्राव । अथ सुखासीनम् एकत्र तरुतले भगिनीद्वितीयं राजानम् आचार्यः समुपसृत्य वक्तुमुपचक्रमे ।

'श्रीमन् ! आकर्ण्यताम् । आख्येयमस्ति नः किञ्चित् । पुरा खलु ताराराजः शैलादुदयादुदयमानः वरुणालयस्य

CC0. In Public Domain. Muthulakshmi Research Academy

विमले वारिणि संक्रान्तम् आत्मनः प्रतिबिम्बं विलोकितवान् । दृष्ट्वा च तदा सस्मार सस्मरः तारायाः मुखस्य । तेनास्वस्थः स्थवीयसः वाष्पबिन्दून् विससर्ज । अधः पततः तान् आचेमुः उदन्वति मुक्ताशुक्तयः । तासाञ्च कुक्षिषु मुक्ताफलान्यभवन् । तानि च रसातलनिवासी वासुकिः आससाद । स तैः एकावलीम् अकल्पयत् । चकार च मन्दाकिनीति नाम तस्याः । सा च सर्वासाम् ओषधीनाम् अधिपतेः सोमस्य प्रभावात् विषघ्नी सन्तापहारिणी च बभूव । स तां सर्वदा विषोष्मशान्तये पर्यधत्त । समतिक्रान्ते कियत्यपि काले कदाचित् ताम् एकावलीम् तस्मात् नागराजात् नानार्जुनो नाम भिक्षुः अभिक्षत लेभे च । स च सातवाहननाम्ने नरेन्द्राय ददौ ताम् । सा चास्माकं शिष्यपरंपरया हस्तमुपगता । सेयम् आयुष्मता गृह्यताम्' इत्यभिधाय तमुद्धृत्य बबन्ध स्कन्धभागे भूपतेः । अथैकदा राज्यश्रियः ताम्बूलवाहिनी पत्रलता पार्थिवं व्यज्ञापयत्—देव ! देवी विज्ञापयति । न स्मराम्यार्यस्य पुरः कदाचिदुच्चैर्वचनमपि । कुतो विज्ञापनम् । इयं हि शुचाम् असह्यता शिथिलयति विनयम् । काषायग्रहणाभ्यनुज्ञया अनुगृह्यतामयं जनः' इति । जनाधिपस्तु तदाकर्ण्य तूष्णीमभूत् । आचार्योऽभ्यधात्—'मेधाविनि !

CC0. In Public Domain. Muthulakshmi Research Academy

नात्यर्थमेवार्हसि मनसि तमसः प्रसरं दातुम् । किमत्र क्रियते । कतभः उपालभ्यते । सर्वम् अक्षिणी निमील्य सोढव्यम् । पुरातन्यः स्थितयः एताः केन शक्यन्तेऽन्यथाकर्तुम् । सर्वं विश्वं नश्वरम् । तत् गुणवतो ज्येष्ठस्य नियोगे सर्वथा स्थातव्यम्' इति । विरतवचसि तस्मिन् निजगाद नरपतिः—'भगवन् ! किञ्चिदर्थये भवन्तम् अस्माभिः भ्रातृवधापकारिणः रिपुकुलस्य प्रलयाय प्रतिज्ञा कृता । अतो नियुज्यतामार्यो मदीये कार्ये । इयं नः स्वसा बाला बहुदुःखखेदिता च लालनीया नित्यम् । अद्य प्रभृति यावदयं जनो लंघयति प्रतिज्ञाभारं तावदिमाम् अत्रभवतः कथाभिः धर्म्याभिः तत्त्वोपदेशैश्च प्रतिबोध्यमानामिच्छामि। इयन्तु ग्रहीष्यति मयैव समं समाप्तकृत्येन काषायाणि' इति । अथ तथेत्यभिनन्दितप्रणये भदन्ते प्रीयमाणः पार्थिवः तत्र तामुषित्वा विभावरीम्, उषसि वसनालंकारादिप्रदानपरितोषितं विसृज्य निर्घातम्, आचार्येण सह स्वसारमादाय, कटकं प्रत्याजगाम । अथ राज्यश्रीप्राप्तिकथां कथयत एवावभासे वासरावसानवेला । अवसिते सन्ध्यासमये अपरिमितयशःपानतृषिताय मुक्तामयश्चषक इव श्वेतभानुरुपानीयत निशया नरेन्द्राय ।

CC0. In Public Domain. Muthulakshmi Research Academy

टिप्पणी

Page 1

ब्रह्मोद्याः Discussions of theological problems, अध्यात्मविद्या सम्बन्धी वाद-विवाद । **कामण्डलवेन** Belonging to a waterpot. कमण्डलु के । **अनुनाथ्यमानोऽपि** Being solicited by, सविनय प्रार्थना किये जाने पर भी ।

page 2

उन्नतिम् pride, गर्व । **संहर रोषम्** Restrain your anger, क्रोध को अपने वश में कीजिये । **रोषदोषनिषद्ये** A market-place of the evil of anger, क्रोधरूपी दुर्गुण का बाजार । **अनागसम्** Free from fault of sin, निर्दोष, निरपराध । **आह्निककरणाय** To perform daily duties, नैत्यिक कृत्य सम्पादन करने के लिये ।

page 3

संस्तुतजनविरहः Separation from familiar people, परिचित व्यक्तियों से वियोग । **उपकण्ठभूमयः** The neighbourhood, पड़ोस के स्थान । **सैकतम्** Made of sand, सिकतानिर्मित, बालू की बनी हुई ।

page 4

नक्तंदिनम् Night and day, रात और दिन । **तुरंगह्वेषितह्लादम्** The sound of neighing of horses, घोड़ों के हिनहिनाने का शब्द ।

CC0. In Public Domain. Muthulakshmi Research Academy

कृतोपसंग्रहणौ Who have shown the respectful salutation, जिन्होंने अभिवादन किया था। **उपजग्राह** Received, ग्रहण किया। **प्रवयसम्** Advanced in age (Older of the two), अवस्था में अधिक (दोनों में से एक बड़ा)।

page 5

अन्तर्वत्नीं A pregnant woman, गर्भिणी स्त्री। **वैजनने मासि** In the last month of pregnancy, गर्भ के अन्तिम मास में। **आसेचनक-दर्शनम्** Charming looking, देखने में आकर्षक, हृदय को मोहित करने वाले। **गव्यूतिमात्र** At a distance of two miles, दो मील की दूरी पर। **पारेशोणम्** On the other bank of the river Sona, शोण नदी के उस पार। **नेयमाकृतिः दिव्यतां व्यभिचरति** Your form in no why falls short of divinity, आपका रूप किसी भी प्रकार देवरूप से न्यून नहीं है। **अनुषङ्गदृष्टो जनः** People seen only by chance, संयोगवश ही दृष्टिगोचर पड़ गया हुआ व्यक्ति।

page 6

निश्चलतारकेण With motionless pupil, निश्चल पुतलियों वाले (से)। **गणरात्रापगमे** After the lapse of few nights, कुछ रात्रियों के व्यतीत हो जाने के पश्चात्। **अन्वक्** Following me, पीछे-पीछे। **वाणिनी** An excellent woman, a lady, स्त्री। **विधेयास्मि ते** I am your servant, मैं आपकी सेविका हूँ।

page 8

निर्विशेषं Impartially, निष्पक्ष भाव से। **अषाढी** One with a hermit's staff, तपस्वी का दंड लिये हुये (पलाश दंड लिये हुये)। **व्ययुज्यत** Was separated from, वियुक्त हो गया, रहित हो गया।

CC0. In Public Domain. Muthulakshmi Research Academy

page 9

संस्थिते पितरि When his father died, पिता की मृत्यु हो जाने पर। **इत्वरो बभूव** He became unrestrained in his actions, चंचल हो गया (इधर-उधर घूमने लगा)। **वैपश्चितीं प्रकृतिं** Learned nature, विद्वानों का-सा स्वभाव। **पारशवः** One born of a Brahmin father and a Sudra mother, ब्राह्मण पिता और शूद्र माता से उत्पन्न हुआ।

page 10

कालातिपातः Delay in time, विलम्ब।

page 11

कृतकशिरुं Refreshed with food and clothing, भोजन और वस्त्र द्वारा ताजा और स्वच्छ। **अन्यथा संभावितोऽस्मि** I am misunderstood, मैं गलत-सलत समझ लिया गया हूँ। **प्रास्थाननिकानि सूक्तानि** Hymns for starting on a journey, यात्रा प्रारम्भ के समय के मंत्र। **द्युम्नं** Wealth; property, धन, सम्पत्ति।

page 12

स्कंधावारं Royal camp, राजकीय शिविर। **दौवारिकः** Door-keeper, द्वारपाल। **अजिरे** Court., आँगन (में)।

page 13

सोमपायिनां Those who have drunk Soma juice,, सोमरस पिये हुए लोगों का। **अभ्यागारिकः** One who takes care of his family, गृहस्थ, जो अपने कुटुम्ब की देखभाल करता है। **अति दक्षिणः** Very gracious, बहुत उदार।

CC0. In Public Domain. Muthulakshmi Research Academy

page 14

शक्याशक्यपरिसंख्यानं न कृतम् You have not thought of what is possible and what is impossible, आपने इस बात को नहीं सोचा कि कौन-सी चीज सम्भव है और कौन-सी चीज असम्भव है। **संख्यातिगाः** Innumerable, असंख्य। **सज्जा** Ready, तैयार।

page 15

सहजैव Natural, स्वाभाविक ही। **दाक्षिणात्यं** Belonging to the South, i. e. Dravidian, दक्षिण देश का निवासी अर्थात् द्रविड़। **मस्करिणं** An ascetic, एक संन्यासी को। **उपनगरं** Near the town, नगर के निकट।

page 16

जीर्णमातृगृहस्य Of the dilapidated Kali Temple, जीर्णशीर्ण कालीमन्दिर का। **कार्पटिकवृन्दस्य** Of the group of ascetics, संन्यासियों के समूह का।

page 17

परिवारात् From its cover, म्यान से। **परद्रव्यग्रहणदुर्विदग्धमपि** Though unknown to receive other's property, यद्यपि दूसरे के द्रव्य को ग्रहण करने में बहुत ही संकोच करने वाला।

page 18

बालमित्रं Friend from boyhood, बाल्यावस्था से ही मित्र। **द्राविडः** A Dravidian, द्रविड़। **विगाढायां शर्वर्याम्** When the night was well advanced, जब रात अधिक व्यतीत हो चुकी थी।

page 19

उत्तानशयस्य Lying on its back, पीठ के बल लेटे हुए (के)।

CC0. In Public Domain. Muthulakshmi Research Academy

जातजातवेदसि With fire kindled in, जिसके अन्दर अग्नि प्रज्वलित थी । **कृष्णोष्णीषम्** With a black turban, काली पगड़ी बाँधे हुए (को) । **शातक्रतवीम्** East, पूर्व । **नातिदवीयसि** Not far from, समीप ।

page 20

तपस्वी Poor; helpless; pitiable, निर्धन, असहाय, दयनीय । **प्रकोष्ठ-प्रहारैः** By strokes of his fist, मुष्टिका के प्रहारों द्वारा । **काकोदर** A serpent, साँप । **कक्ष्यांम्** The end of the lower garment which, after the cloth is carried round the body, is brought up behind and stuck into the waist-band, नीचे के वस्त्र का छोर, जो कि शरीर पर वस्त्र लपेटने के पश्चात् पीछे ले जाया जाता है और कमर में दृढ़ता-पूर्वक कसा जाता है ।

page 21

साधयतु Attain, प्राप्त करे ।

page 22

क्षीणभूयिष्ठायां The greater part of which had passed away, जिसका अधिक अंश व्यतीत हो चुका था । **निसर्गतः** By nature, स्वभाव से ही । **परिणतप्रायायान्तु श्यामायाम्** When the night had almost passed away, जब कि रात्रि लगभग समाप्त हो चुकी थी ।

page 23

रराण Sounded, बजी, आवाज हुई । **मुदोवसरे** On an occasion for joy, प्रसन्नता के अवसर पर ।

page 24

अष्टवर्षदेशीयं About eight years, लगभग आठ वर्ष का । **उत्तरापथं** To the north, उत्तर की ओर ।

CC0. In Public Domain. Muthulakshmi Research Academy

page 25

प्रयाणकानि Stages in the journey, पड़ाव । **वासतेय्याः** Of the night, रात्रि का । **हरिहयः** The sun, सूर्य । **चीरचीरिकया** By a rag, जीर्ण वस्त्र से ।

page 26

आत्मपरिबर्हं His belongings, अपनी सारी सम्पत्ति । **संपिण्डितम्** Consisting of, युक्त ।

page 27

वेपथुमता Trembling काँपते हुए (से) । **क्षयक्षामकंठ** His throat, meek due to emaciation, जिसका गला दुर्बलता के कारण सूख गया था । **भिषगनुरोधः** The request of doctors, वैद्यों का हठ । **उपह्वरे** In secret, एकान्त में । **सुतनिर्विशेषं** In the same way as a son, पुत्र के सदृश ।

page 28

क्षपामुखे At the beginning of the night, रात्रि के प्रारम्भ में । **प्लुष्ट इव** As if burnt, जले हुए के सदृश । **प्रत्यग्रस्नानार्द्रदेहां** With her body wet to bathing just before, ठीक उसी समय स्नान करने के कारण जिसका शरीर आर्द्र था ।

page 26

उत्तानितं Upraised, उत्तान किया हुआ । **प्राकृतप्रमदेव** Like a countrywoman, ग्रामीण स्त्री के समान । **मन्युवेगे** The force of grief, दुःख का वेग । **कदर्थनीया** Teased, troubled, पीड़ित किये जाने योग्य ।

page 30

परवर्त्यमानतारकं The pupils of whose eyes were revolving,

CC0. In Public Domain. Muthulakshmi Research Academy
जिसके नेत्रों की पुतलियाँ नाच रही थीं। **पूषापि** The sun also, सूर्य भी। **शोकमूकेन** Silent due to sorrow, शोक के कारण मौन (चुपचाप)। **निर्व्यवधानायां** Uncovered, नंगी, जिस पर कुछ बिछा हुआ नहीं था।

page 31

अभिमुख्यम् Inclination, रुचि, अभिलाषा (को)। **कीकसेषु** Bones, हड्डियों (में)। **प्रथीयसां** Big, बड़े।

page 32

विस्रस्तकुन्तलम् With locks of hair loosened, जिसके बड़े केश बिखरे हुए थे। **विनिहितैकोपबर्हायाम्** On which only one pillow was placed, जिस पर केवल एक ही तकिया रक्खी हुई थी। **जोषम् अस्थात्** Remained silent, चुप रहा। **वामता** Perversity, कुटिलता। **परासुतां गते** When he was dead, मर जाने पर। **कापुरुषम्** A contemptible man, a coward, घृणास्पद पुरुष, कायर। **विलीनंधैर्यम्** Courage has disappeared, धैर्य नष्ट हो गया।

page 33

निस्त्रिंशम् Sword, तलवार। **उपरतः** Died, मर गया। **कालायस-निगड** Iron-fetters, लौह शृंखलायें (बेड़ियाँ)। **जिघृक्षुः** Desiring to conquer, विजय की इच्छा वाला।

page 34

व्यतिकरम् Misfortune, calamity, विपत्ति। **अभ्यमित्रम्** Against the enemy, शत्रु के विरुद्ध। **अभ्रंलिहम्** Touching the clouds, i. e. very high, बादल को छूने वाले, बहुत ऊँचे।

page 35

उत्पाताः Omens foreboding evil, अनर्थ, अपशकुन। **बृहदश्ववार**

CC0. In Public Domain. Muthulakshmi Research Academy

The chief cavalry officer, अश्वारोही सेना का प्रधान पदाधिकारी । जाल्म A rogue, a rascal, दुष्ट ।

page 36

प्रतीकारशून्यं Without revenge, बिना बदला लिये हुए । **परिगणितैरेव** Numbered, i. e; a few, इने-गिने हुए अर्थात् थोड़े से ही । **तनूनपाति** In fire, अग्नि में । **प्रचारनिर्गतानि** Which have gone out to ramble, जो भ्रमण करने गये हैं । **उदवसितेषु** In houses, घरों में ।

page 37

प्रत्यजिरं In every courtyard, प्रत्येक आँगन में । **शिवा** Female-jackals, गीदड़ (मादा), सियारिन । **उपतोरणम्** Near the gates, फाटक के पास । **कौलेयकगणः** Group of dogs, कुत्तों के समूह । **उल्कादण्डाः** Fire-brands, टटने वाले तारे । **वात्या** Whirlwind, चक्रवात, बवण्डर । **आपुपूरे** Filled, भरे हुए ।

page 38

प्रास्तसमयोगः Having dispersed the assembly, सभा को विसर्जित करके । **प्रभूतप्राभृतभृतां** Carrying many presentations, बहुत सी भेंट लिये हुए । **अविप्रकृष्टं** Not far away दूर नहीं; समीप ।

page 39

सप्तर्चिः Fire, अग्नि । **वृषदश्वः** Wind, वायु । **निचोलकात्** From its case, म्यान से । **कार्माः** Servants, भृत्य, नौकर-चाकर ।

page 40

जाडिम्ना By frigidity, coldness, जड़ता से, शीत । **अजर्यं संगतं** Undiminishing friendship, कभी भी क्षीण न होने वाली मित्रता । **प्रतिकौशलिका** A present in return, बदले में उपहार, प्रत्युपहार । **असावि** Was given birth to, उत्पन्न किया गया ।

CC0. In Public Domain. Muthulakshmi Research Academy

page 41

संकल्प His intention, उनका विचार। **परागतः** Come, आया हुआ। आकर। **अनवरतैः** Haltless, कहीं भी न रुकने वालों से।

page 43

हरिणरंहसः Swift as the deer, हिरण के सदृश शीघ्रगामी। **जातरूपमयनालं** With golden handle, जिसकी मूठ सोने की बनी हुई थी। **स्वस्त्रीयः** Son of siter, बहिन का पुत्र, भांजा।

page 44

पाराशरी An ascetic, संन्यासी। **सौगतमते** In the Buddhist religion, बौद्ध धर्म में। **भिक्षन्तः** The Buddhist mendicant, बौद्ध भिक्षु (संन्यासी)। **पारिप्लवं** Disturbed, विक्षिप्त (घबड़ाया हुआ)।

page 46

स्त्रैणात् From the group of women, स्त्रियों के समूह में से। **कर्दाशिता** Troubled; distressed, पीड़ित किये जाने पर। **मुमूर्षोः** Desiring to die, मरने के इच्छुक (का)।

page 47

परावृत्तनयनः With eyes turned, नेत्रों को दूसरी ओर करके।

page 48

सस्मरः With love, काम-पीड़ित। **स्थवीयसः** Large, बड़े-बड़े। **एकावलीम्** A necklace of one string, एक सूत्र का हार।

page 49

नश्वरम् Perishable, नाशवान्, नष्ट हो जाने वाली। **विभावरीम्** Night, रात्रि। **श्वेतभानु** The Moon, चन्द्रमा।

CC0. In Public Domain. Muthulakshmi Research Academy